ॐ नमस्तक्षब्भ्यो रथकारेब्भ्यश्च वो नमो नम ऽ कुलालेब्भ्य ऽ कर्म्मा-रेब्भ्यश्च वो नमो नमो निषादेब्भ्यः पुञ्जिष्ठेब्भ्यश्श्च वो नमो नमः श्श्वनि-ब्भ्यो मृगयुब्भ्यश्श्च वो नमो नमः॥

ॐ सगण सदाशिवाय नमः ॥ अक्षतान् समर्पयामि ॥

सप्तधान्य

ॐ व्रीहयश्च मे यवाश्चमेमाषाश्श्च मे तिलाश्चमे मुद्गाश्च्च मे खल्वाश्चमे प्रियङ्गवश्च मेऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे गोधूमाश्च मे मसूराश्च मे

यज्ञेनकल्पन्ताम् ॥

ॐ सगण सदाशिवाय नमः ॥ धान्यानि समर्पयामि ॥

पुष्प

मल्लिकादि सुगन्धीनि मालत्यादीनि वै प्रभो।
मयाहृतानि पुष्पाणि पूजार्थं प्रति गृह्यताम् ॥

ॐ नमः पार्याय चावार्य्याय च नमः प्रतरणायचोत्तरणाय च नमस्तीर्थ्याय च कूल्याय च नमः शष्प्याय च फेन्याय च।

पुष्पान्त पूजा करने के बाद आवरण पूजा करे।

आवरण पूजा

एकादश रुद्र पूजा : ॐ अघोराय नमः। ॐ पशुपतये नमः। ॐ शर्वाय नमः ॥ ॐ विरूपाक्षाय नमः ॥ ॐ विश्वरूपिणे नमः। ॐ त्र्यम्बकाय नमः। ॐ कपर्दिने नमः। ॐ भैरवाय नमः। ॐ शूलपाणये नमः। ॐ ईशानाय नमः। ॐ महेश्वराय नमः।

शक्ति पूजा

ॐ उमायै नमः। ॐ शंकरप्रियायै नमः। ॐ पार्वत्यै नमः। ॐ गौर्यै नमः। ॐ काल्यै नमः। ॐ कालिन्द्यै नमः। ॐ कोटिदेव्यै नमः। ॐ विश्वधारिण्यै नमः। ॐ ह्रां नमः। ॐ ह्रीं नमः। ॐ गंगादेव्यै नमः ॥

गणपूजा

ॐ गणपतये नमः। ॐ कार्तिकेयाय नमः। ॐ पुष्पदन्ताय

नमः । ॐ कपर्दिने नमः । ॐ भैरवाय नमः । ॐ शूलपाणये नमः । ॐ ईश्वराय नमः । ॐ दण्डपाणये नमः । ॐ नन्दिने नमः । ॐ महाकालाय नमः । ॐ कीर्तिमुखाय नमः ।

अष्टमूर्तिपूजा

ॐ शर्व्वाय क्षितिमूर्तये नमः । ॐ भवाय जलमूर्तये नमः । ॐ उग्राय वायुमूर्तये नमः । ॐ रुद्राग्निमूर्तये नमः । ॐ भीमाया काशमूर्तये नमः । ॐ पशुपतये यजमानमूर्तये नमः । ॐ ईशानाय सूर्यमूर्तये नमः । ॐ महादेवाय सोममूर्तये नमः ।

ॐ सगण सदाशिवाय सपरिवाराय नमः ॥

आवरण देवताओं की प्रतिष्ठा एवं पञ्चोपचार पूजन करे ।

ॐ एष वै प्रतिष्ठानाम् यज्ञो यत्रै तेन यज्ञेन यजन्ते सर्वमेव प्रतिष्ठतम् भवति ।

ॐ आवरणदेवताभ्यो नमः । सर्वोपचारार्थे गन्धाक्षतपुष्पाणि सर्मर्पयामि ।

पुष्पमाला

पुष्पैः नानाविधैः दिव्यै कुमदैरथ चम्पकैः ॥
कर्णिकारैः सधत्तूरैः मन्दारैश्च मनोहरैः ॥
नानापंकजपुष्पैश्च ग्रथिता पल्लवैरपि ॥
बिल्वपत्रयुतां मालां ग्रहाण परमेश्वर ॥

ॐ ओषधी ꣳ प्रतिमोदध्वम्पुष्पवतीꣳ प्प्रसूवरी ꣳ ॥ अश्वाइवसजित्वरीर्व्वीरुधः पारयिष्णवः ॥

ॐ सगण सदाशिवाय नमः । पुष्पमालां परिधापयामि ।

दूर्वा

त्वं दूर्वेऽमृतजन्मासि वन्दितासि सुरासरैः ।
सौभाग्यं सन्ततिं देहि सर्वकाम करीभव ॥

ॐ काण्डात्काण्डात्प्ररोहन्ती पुरुषः परुषस्परि ॥ एवानो दूर्वे प्रतनु सहस्त्रेण शतेन च ॥

ॐ गणपतये नमः । दूर्वाङ्कुरान् समर्पयामि । सदाशिवाय दुर्वाङ्कुरान् समर्पयामि ।

शमीपत्र

अमंगलानां च शमनी शमनी दुष्कृतस्य च ।
दुस्वप्नानाशिनी धन्यां प्रपद्येऽहं शमीं शुभाम् ॥

ॐ अग्निर्मूर्द्धादिवः ककुत्पतिः पृथिव्याऽअयम् ॥ अपा ँ रेता ँ सि जिन्वति ॥

ॐ सगण सदाशिवाय नमः । शमीपत्रान् समर्पयामि ॥

तुलसीपत्र

तुलसीपत्र पवित्रानि हरिप्रीति कराणि च ।
भक्त्या समर्पयेतुभ्यं मोक्षज्ञान प्रदोभव ॥

ॐ इदं व्विष्णुर्व्विचक्रमेत्त्रेधा निदधे पदम्। समूढमस्य पाᳬ सुरेस्वाहा॥

ॐ सगण सदाशिवाय नमः। तुलसीपत्राणि समर्पयामि।

बिल्वपत्र

त्रिदलं त्रिगुणकारं त्रिनेत्रं च त्रिधायुधं।
त्रिजन्मपापसंहारं बिल्वपत्रं शिवार्पणम् ॥१॥

काशीवासनिवासी च कालभैरव पूजनम्।
प्रयागे माघमासे च बिल्वपत्रं शिवार्पणम् ॥२॥

दर्शनं बिल्वपत्रस्य. स्पर्शनं पापनाशनम्।
अघोर पापसंहारं बिल्वपत्रं शिवार्पणम् ॥३॥

अखण्डैः बिल्वपत्रैश्च पूजयेच्छिवशंकरं।
कोटिकन्या महादानं बिल्वपत्रं शिवार्पणम् ॥४॥

ग्रहाण बिल्वपत्राणि सपुष्पानि महेश्वर।
सुगन्धीनि भवानीय शिवस्त्वं कुसुमप्रिय ॥५॥

त्रिशाखैः बिल्वपत्रैश्च अच्छिद्रैः कोमलैः शुभैः।
तव पूजां करिष्यामि ग्रहाण परमेश्वर ॥६॥

श्रीवृक्षामृतसम्भूतं शङ्करस्य सदाप्रियं।
पवित्रं ते प्रयच्छामि बिल्वपत्रं सुरेश्वर ॥७॥

त्रिशाखैः बिल्वपत्रैश्च कोमलैः चातिसुन्दरैः।
त्वां पूजयामि विश्वेश प्रसन्नो भव सर्वदा ॥८॥

अमृतोद्भव श्रीवृक्षं शङ्करस्य सदाप्रियं।
तत्ते शंभो प्रयच्छामि बिल्वपत्रं सुरेश्वर ॥९॥

ॐ नमो बिल्मिने च कवचिने च

नमो व्वर्म्मिणे च वरूथिने च नमः श्रुताय च श्रुतसेनाय च नमो दुन्दुभ्याय चाहनन्याय च ॥

ॐ नमः पर्ण्णाय च पर्ण्णशदाय च नमऽ उद्गुरमाणाय चाभिघ्नते च नमऽ आखिदते च प्रखिदते च नमऽइषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमो नमो वः किरिकेभ्यो देवाना हृदयेभ्यो नमो विचिन्वत्केभ्यो नमो विक्षिणत्केभ्यो नमऽ आनिर्हतेभ्यः ॥

सगण सदाशिवाय बिल्वपत्राणि समर्पयामि ॥

अर्क-धत्तूर-आदि

अर्कधत्तूरपुष्पाणि सफलानि महेश्वर ।
भक्त्या तुभ्यं प्रदास्यामि भोगमोक्ष प्रदोभव ॥

ॐ उदुत्यञ्जातवेदसन्देवं व्वहन्ति केतवः दृशे विश्श्वाय सूर्य्यम् ॥

ॐ सगण सदाशिवाय नमः । अर्कपुष्पाणि समर्पयामि ॥

ॐ धामन्ते विश्वं भुवनमधिश्रित-मन्त ऽ समुद्रे हृद्यन्तरायुषि ॥ अपामनीके समिथे यऽआभृतस्तमश्याम मधुमन्तंत ऊर्मिम् ॥

ॐ सगण सदा शिवाय नमः । धत्तूर फलानि समर्पयामि ॥

विजया

विजया विजयदात्री चेतानन्द प्रदायिनी ।
आशुतोष महादेव सर्वत्र विजयं कुरु ॥

ॐ विजयन्धनुः कपर्द्दिनो विशल्यो वाणवाँ २ऽ उत । अनेशन्नस्य याऽइषवऽ आभुरस्य निषङ्गधि ॥

ॐ सगण सदाशिवाय नमः । विजयापानं समर्पयामि ॥

धूप

वनस्पतिरसोद्भूतं गन्धाढ्यं गन्धमुत्तमम् ।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥

ॐ नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्षायचशतधन्वने च नमो गिरिशयाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च ॥

ॐ सगण सदाशिवाय नमः । प्रत्यक्ष धूपमाघ्रापयामि ॥

दीपक

साज्यं च वर्तिसंयुक्तं वह्निना योजितं मया ।
दीपं ग्रहाण देवेश त्र्योलेक्य तिमिरापहम् ॥

ॐ नमं आशवें चाजिरायं च नमः शीग्घ्रायं च शीब्भ्याय च नम ऽऊर्म्म्यायं चा वस्वन्न्याय च नमों नादेयायं च द्वीप्प्यायं च ॥

ॐ सगण सदाशिवाय नमः । प्रत्यक्षदीपं दर्शयामि ॥

हस्तप्रक्षालनं ॥

नैवेद्य

शर्कराघृतसंयुक्तं मधुरं सुस्वादुचोत्तमम् ।
उपाहार समायुक्तं नैवेद्यं प्रतिगृह्यताम् ॥

ॐ नमों ज्येष्ठायं च कनिष्ठायं च नमः पूर्व्वजायंचापरजायं च नमों मद्ध्यमायं चापगल्भायं च नमों जघन्न्याय च बुध्ध्न्याय च ॥

ॐ प्राणाय स्वाहाः । ॐ अपानाय स्वाहा । ॐ व्यानाय स्वाहा । ॐ उदानाय स्वाहा । ॐ समानाय स्वाहा ।

ॐ सगण सदाशिवाय नमः । नैवेद्यं सुभोजयामि ॥

आचमन

अतितृप्तिकरं तोयं सुगन्धं च पिबेच्छया ॥
त्वयि तृप्ते जगत्तृप्तं नित्यं तृप्ते महात्मनि ॥

ॐ नमः सोभ्याय च प्रतिसर्य्याय च नमो याम्याय च क्षेम्याय च नम ॆ श्लोक्याय चा वसान्याय च नमऽ उर्वर्य्याय च खल्याय च ॥

ॐ सगण सदाशिवाय नमः । आचमनीयजलं समर्पयामि ।

ऋतुफल

फलेन फलितं सर्वं त्रैलोक्यं स चराचरं ।
तस्मात्फल प्रदानेन सफला सन्तु मनोरथाः ॥

ॐ इमारुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मती ः । यथाशमसद्द्विपदे चतुष्पदे विश्वंपुष्टंग्रामेऽअस्मिन्ननातुरम् ।

ॐ सगण सदाशिवाय नमः । कालोद्भवानि फलानि समर्पयामि ॥

सफल ताम्बूल

पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् ।
खदिरेण समायुक्तं ताम्बूलं प्रतिगृह्यताम् ॥

ॐ पातन्नों अश्विनाविवा पाहि नक्त
६ सरस्वति । दैव्या होतारा भिषजा
पातमिन्द्र ँ सचा सुते ॥

ॐ सगण सदाशिवाय नमः । सफलताम्बूलं समर्पयामि ।

दक्षिणा-दान

हिरण्यगर्भ गर्भस्थं हेमवीजं विभावसो ।
अनन्तपुण्य फलदः अतः शान्तिं प्रयच्छ मे ॥

ॐ यद्दतं यत्परादानं यत्पूर्त्तं याश्च
दक्षिणाः । तदग्निर्वैश्वकर्म्मणः स्वर्द्देवेषु
नों दधत् ।

ॐ सगण सदाशिवाय नमः । कृतायाः पूजायाः साद्गुण्यार्थे द्रव्यदक्षिणां समर्पयामि ।

हाथ में पुष्पफलादि लेकर स्तुति करें :

ॐ ओजश्च मे सहश्चचमऽआत्क्मा च
मे तनूश्च मे शर्म्म च मेव्वर्म्मच मेऽङ्गानि
च मेस्थीनिच मे परूᳪ षिचमे शरीराणि
च मऽ आयुश्चमे जराचं मे यज्ञेन
कल्प्पन्ताम् ॥

मन्दारमाला कुलितालिकायै कपालमालाङ्कित शेखराय।
दिव्याम्बरायै च दिगम्बराय नमः शिवायै च नमः शिवाय॥

नमः सर्वहितार्थाय जगदाधार हेतवे।
साष्टाङ्गः प्रणामो हि प्रयत्नेन मयाकृतः॥
शिवतत्वं न जानामि कीदृशोऽसि महेश्वरः।
यादृशोऽसि महादेव तादृशाय नमो नमः॥

षड्वक्त्रपूजा

ॐ प्रालेयामलमिन्दुकुन्दधवलं गोक्षीरफेनप्रभम्।
भस्माभ्यङ्गमनङ्गदेहदहनं ज्वालावलीलोचनम्॥
ब्रह्मेन्द्राग्नि मरुद्गणैः स्तुतिपरैरभ्यर्चितं योगिभिः।
वन्देऽहं सकलं कलङ्करहितं स्थाणोर्मुखम् पश्चिमम्॥

॥ ॐ पश्चिमवक्त्राय शिवाय नमः॥

ॐ गौरं कुङ्कुम पिङ्गल सुतिलकं व्यापाण्डु गण्डस्थलम्।
भ्रू विक्षेप कटाक्ष वीक्षणलसत्संसक्त कर्णोत्पलम्॥
स्निग्धं बिम्बफलाधरं प्रहसितं नीलालकालं कृतम्।
वन्दे पूर्णशशाङ्कमण्डलनिभं वक्त्रं हरस्योत्तरम्॥

॥ ॐ उत्तरवक्त्राय शिवाय नमः॥

ॐ कालाभ्रभ्रमराञ्जनाचलनिभं व्यादीप्त पिङ्गेक्षणम्।
खण्डेन्दुद्युति मिश्रदोग्रदशनं प्रोद्भिन्न दंष्ट्राङ्कुरम्॥
सर्पप्रोत कपालशक्ति सुलभं व्याकीर्ण तच्छेखरम्।
वन्दे दक्षिणमीश्वरस्य जटिलं भ्रूभङ्गरौद्रं मुखं॥

॥ ॐ दक्षिणवक्त्राय शिवाय नमः॥

ॐ संवर्त्ताग्नितडित्प्रदीप कनक प्रस्पर्द्धितेजारुणम्।
गम्भीरस्मित निःसृतोग्रदर्शनं प्रोद्भासिताम्राधरम्॥

बालेन्दुद्युतिलोलपिङ्गलजटा भारं प्रबद्धोरगम् ।
वन्दे सिद्ध सुरासुरेन्द्र नमितं पूर्वं मुखं शूलिनः ॥

॥ ॐ पूर्ववक्त्राय शिवाय नमः ॥

ॐ व्यक्ताव्यक्त गुणोत्तरं सुवदनं षड्विंशतत्वाधिकम् ।
वेदाद्यक्षरमन्त्रशास्त्रनिलयं ध्येयं सदायोगिभिः ॥
वन्दे तामसवर्जितेन मनसा सूक्ष्मातिसूक्ष्मं परम् ।
शान्तं पंचममीश्वरस्यवदनं खव्याप्त तेजोमयम् ॥

॥ ॐ ऊर्ध्ववक्त्राय शिवाय नमः ॥

ॐ यद्वेदाद्यमनन्तशास्त्रमगुणं सम्पूजितं चामरैः ।
पुण्याङ्गाम्बुज नागपुष्पवकुला नागासुराद्यर्चितम् ॥
नित्यं भानुसहस्त्रदीप्तकिरणं कालज्ञतेजोऽमयम् ।
तत्कल्याणकरं नमामि सततं पाताल षष्ठं मुखम् ॥

॥ ॐ पातालवक्त्राय शिवाय नमः ॥

अथ द्वादश ज्योतिर्लिङ्गपूजा

ॐ सौराष्ट्रदेशे विशदेऽतिरम्ये ज्योतिर्मयं चन्द्रकला वसन्तम् ।
भक्तिप्रदानाय कृपावतीर्णं तं सोमनाथं शरणं प्रपद्ये ॥१॥

॥ ॐ सोमनाथाय नमः ॥

ॐ श्रीशैलश्रृंगे विबुधातिसंगे तुलाद्रितुंगेऽपि मुदा वसन्तम् ।
तमर्जुनं मल्लिकपूर्वमेकं नमामि संसार समुद्रसेतुं ॥२॥

॥ ॐ मल्लिकार्जुनाय नमः ॥

ॐ अवन्तिकायां विहितावतारं भक्तिप्रदानाय च सज्जनानाम् ।
अकालमृत्यो परिरक्षणार्थं वन्देमहाकाल महासुरेशम् ॥३॥

Scanned by CamScanner

॥ ॐ महाकालेश्वराय नमः ॥

ॐ कावेरिकानर्मदयोः पवित्रे समागमे सज्जन तारणाय ।
सदैव मान्धातृपदे वसन्तमोंकारमीशं शिवमेकमीडे ॥४॥

॥ ॐ ओंकारेश्वराय नमः ॥

ॐ पूर्वोत्तरे प्रज्वलिका निधाने सदा वसन्तं गिरजासमेतं ।
सुरासुरैराधित पादपद्मं श्रीवैद्यनाथं शरणं प्रपद्ये ॥५॥

॥ ॐ वैद्यनाथाय नमः ॥

ॐ याम्ये सदङ्गे नगरेऽतिरम्ये विभूषिताङ्गं विविधैश्च भोगैः ।
सदभक्तिमुक्तिं प्रदमेकमीशं श्रीनागनाथं शरणं प्रपद्ये ॥६॥

॥ ॐ नागनाथाय नमः ॥

ॐ महाद्रिपार्श्वे च तटे रमन्तं सम्पूज्यमानं सततं मुनीन्द्रैः ।
सुरासुरैयक्षमहोरगाद्यै केदारमीशं शिवमेकमीडे ॥७॥

॥ ॐ केदारनाथाय नमः ॥

ॐ सह्याद्रिशीर्षे विमलेवसन्तं गोदावरीतीर पवित्रदेशे ।
यद्दशनात्पावकमाशु नाशं प्रयाति तं त्र्यम्बकमीशमीडे ॥८॥

॥ ॐ त्र्यम्बकेश्वराय नमः ॥

ॐ सुताम्रपर्णी जलराशियोगे निवद्धसेतुं विशिखैरसंख्यैः ।
श्रीरामचन्द्रेण समर्पितं तत् रामेश्वराख्यं नियतं नमामि ॥९॥

॥ ॐ रामेश्वराय नमः ॥

ॐ यं डाकिनी शाकिनिका निसेव्यमानं पिशिताशनैश्च ।
सदैव भीमादिपद प्रसिद्धं तं शङ्करं भक्तहितं नमामि ॥१०॥

॥ ॐ भीमशंकराय नमः ॥

ॐ सानन्दमानन्दवने वसन्तं आनन्दकन्दं हतपापवृन्दम् ।

वाराणसीनाथमनाथनाथं श्रीविश्वनाथं शरणं प्रपद्ये ॥११॥

॥ ॐ काशीविश्वनाथाय नमः ॥

ॐ इलापुरे रम्यविशालकेऽस्मिन् समुल्लसंतं च जगद्वरेण्यं ।
वन्दे महोदारतर स्वभावं घृष्णेश्वराख्यं शिवमेकमीडे ॥१२॥

॥ ॐ घृष्णेश्वराय नमः ॥

ॐ ज्यौतिर्मयं द्वादश लिङ्गकां शिवात्मनां प्रोक्तमिदं क्रमेण ।
स्तोत्रं पठित्वा मनुजोति भक्त्या फलं तदालोक्य निजंभवेच्च ॥

॥ द्वादशज्योतिर्लिङ्ग देवताभ्यो नमः ॥

शिवपंचाक्षर स्तोत्र

ॐ नागेन्द्रहाराय त्रिलोचनाय भस्माङ्गरागाय महेश्वराय ।
नित्याय शुद्धाय दिगम्बराय तस्मै नकाराय नमः शिवाय ॥१॥

ॐ मन्दाकिनीसलिल चन्दनचर्चिताय नन्दीश्वरप्रमथनाथमहेश्वराय ।
मन्दारपुष्पबहुपुष्पविभूषिताय तस्मै मकाराय नमः शिवाय ॥२॥

ॐ शिवाय गौरीवदनाब्जवृन्द सूर्याय दक्षाध्वर नाशनाय ।
श्री नीलकण्ठाय वृषभध्वजाय तस्मै शिकाराय नमः शिवाय ॥३॥

ॐ वसिष्ठकंभोद्भवगौतमाद्य सुनीन्द्र देवार्चित शेखराय ।
चन्द्रार्कवैश्वानर लोचनाय तस्मै वकाराय नमः शिवाय ॥४॥

ॐ यक्षस्वरूपाय जटाधराय पिनाकहस्ताय सनातनाय ।
दिव्याय देवाय दिगम्बराय तस्मै यकाराय नमः शिवाय ॥५॥

पंचाक्षरमिदं स्तोत्रं यः पठेच्छिवसन्निधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥

इसके बाद भगवान शंकर की मूर्ति पर सछिद्रकलश तिपाई पर रखे या रस्सी के सहारे लटका दे तथा उसमें दूध-दही-घी-शक्कर-शहद आदि जल में मिलाकर एक या एकाधिक पदार्थों से

अविच्छिन्न धारा चलावे। कामनाभेद से अन्य वस्तुओं से भी अभिषेक कर सकता है। जैसे गन्धोदक-इक्षुरस इत्यादि।

इसके बाद रुद्राभिषेक (रुद्राष्टाध्यायी का पूरा पाठ) शतरुद्री से (केवल १०० मंत्रों से) अथवा नमकचमकात्मक सम्पूर्ण रुद्राभिषेक अपनी रुचि के अनुसार करे।

षडंग न्यासः—मनोजूतिरिति मन्त्रस्य बृहस्पति-ऋषिः बृहतीछन्दः बृहस्पतिर्देवता हृदयन्यासे जपे पाठे विनियोगः।

ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्य-बृहस्पतिर्य्यज्ञमिमन्तनो त्वरिष्टंय्यज्ञ ँ समिमन्दधातु विश्वेदेवासऽइहमा दयन्तामो ३ मप्रतिष्ठ॥ हृदयाय नमः।

अबोद्ध्यग्निरितिमंत्रस्य बुधगविष्ठिराऋषिः त्रिष्टुप्छन्दः अग्निर्देवता शिरोन्यासे जपेपाठे विनियोगः।

ॐ अबोद्ध्यग्नि ँ समिधा जनानाम्प्रति धेनुमिवायतीमुषासम्। यह्वाऽइवप्प्रवया मुज्जिहानाः प्प्रभानवः सिस्त्रतेनाकमच्छ॥ शिरसे स्वाहा।

मूर्द्धानमितिमंत्रस्य भरद्वाजऋषिः त्रिष्टुप्छन्दः अग्निर्देवता शिखान्यासे जपे पाठे विनियोगः॥

ॐ मूर्द्धानन्दिवोऽअरतिम्पृथिव्या-
व्वैश्वानरमृतऽआजातमग्निम् । कवि ꣳ
सम्राज मतिथिञ्जनानामासन्नापात्र-
ञ्जनयन्तदेवा ? । शिखायै वौषट् ॥

मर्म्माणितिमन्त्रस्य अप्रतिरथऋषिः, विराट् छन्दः मर्माणि देवता कवचन्यासे जपे पाठे विनियोगः ।

ॐ मर्माणिते वर्म्मणाच्छादयामिसो
मस्त्वा राजा मृतेनानुवस्ताम् । उरो-
र्व्वरीयो व्वरुणस्ते कृणो तु जयन्तन्त्वा नु
देवा मदन्तु ॥ कवचाय हुम् ॥

विश्वतश्चक्षुरितिमंत्रस्य विश्वकर्माभौवनऋषिः त्रिष्टुप्छन्दः विश्वकर्मादेवता नेत्रन्यासे जपे पाठे विनियोगः ।

ॐ विश्वतश्चक्षुरुतव्विश्वतो मुखो
व्विश्वतो बाहुरुत व्विश्वतस्पात् ।
सम्बाहुब्भ्यान्धमति सम्पतत्रैर्द्यावा भूमी
जनयन्देवऽएकः ॥ नेत्रत्रयाय वौषट् ।

मानस्तोकेतिमन्त्रस्य परमेष्ठीऋषिः जगतीछन्दः एकरुद्रो देवता अस्त्र न्यासे जपे पाठे विनियोगः ।

ॐ मानस्तोके तनयेमानऽ आयुषिमानो गोषुमानोऽ अश्वेषुरीरिषः ॥ मानो व्वीरान्नुद्रभामिनो व्वधीर्हविष्मन्तः सदमित्वा हवामहे । अस्त्राय फट् ।

अथ प्रथमोऽध्यायः

श्रीगणेशाय नमः ॥ हरिः ॐ ॥

गणानान्त्वागणपतिं हवामहेप्प्रियाणान्त्वाप्प्रियपतिं हवामहे निधीनान्त्वा निधिपतिं हवामहे व्वसोमम ॥ आहमजानिगर्ब्भधमात्त्वमजासिगर्ब्भधम् ॥१॥

गायत्रीत्त्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्या सह ॥ बृहत्त्युष्णिहा ककुप्सूचीभिः शम्म्यन्तुत्त्वा ॥२॥ द्विपदा याश्चतुष्पदास्त्रिपदा याश्चषट्पदाः ॥ व्विच्छन्दा याश्चसच्छन्दाः सूचीभिः शम्म्यन्तु-

त्त्वा ॥ ३॥ सहस्तोमा ᳪ सहच्छन्दसऽ-
आवृत÷ सहप्प्रमाऽऋषय ᳪ सप्पतदैव्या÷
पूर्व्वेषाम्पन्था मनुदृश्यधीराऽअन्वा-
लेभिरेरत्थ्योनरश्म्मीन् ॥४॥ ॐ
यज्जाग्ग्रतो दूरमुदैतिदैवन्तदुसुप्पतस्यत-
थैवैति ॥ दूरङ्गमज्योतिषाञ्ज्योतिरे-
कन्तन्न्मेमन÷ शिवसङ्कल्प्पमस्तु ॥५॥
येनकम्म्माण्यपसोमनीषिणोयज्ञे कृण्व-
न्तिविदथेषुधीरा ᳪ ॥ यदपूर्व्वंय्यक्षमन्त
ऽ प्प्रजानान्तन्न्मे मन÷ शिवसङ्कल्प्पमस्तु
॥६॥ यत्प्रज्ञानमुतचेतो धृतिश्चयज्ज्यो-
तिरन्तर मृतम्प्रजासु ॥ यस्म्मान्नऽऋते
किञ्चनकम्म्मंक्रियतेतन्न्मे मन÷ शिव-
सङ्कल्प्पमस्तु ॥७॥ येने दम्भूतम्भुवन-
म्भविष्य्यत्परिगृहीतममृतेन सर्व्वम् ॥ येन
यज्ञस्तायतेसप्तहोता तन्न्मे मन÷

शिवसङ्कल्प्पमस्तु ॥८॥ यस्मिन्नृच ऽ सामयजू ಲ षियस्मिन्प्रतिष्ठितारथना भाविवारा ऽ ॥ यस्मिँश्चित्त ह सर्व्व- मोतम्प्रजानान्तन्मेमनः शिवसङ्क- ल्प्पमस्तु ॥९॥ सुषारथिरश्श्वानिव- यन्मनुष्ष्यान्नेनीयतेभीशुभिर्व्वाजिनऽइव ॥ हृत्प्रतिष्ठंयदजिरञ्जविष्ठन्तन्मे मनः शिवसङ्कल्प्पमस्तु ॥१०॥

इति रुद्रे प्रथमोऽध्यायः ॥१॥

अथ द्वितीयोऽध्यायः

हरिः ॐ ॥ सहस्त्रशीर्षा पुरुष ऽ सहस्त्राक्ष ऽ सहस्त्रपात् ॥ सभूमि ह सर्व्वतस्पृत्त्वात्त्यतिष्ठद्दशाङ्गुलम् ॥१॥ पुरुषऽएवेद ह सर्व्वंय्यद्भूतंय्यच- भाव्व्यम्॥ उतामृतत्त्वस्स्येशानोयद- न्नेनातिरोहति ॥२॥ एतावानस्यमहि-

मातोज्ज्यां याँश्चपूरुषः ॥ पादो-
ऽस्यव्विश्वा भूतानित्रिपादस्या-
मृतन्दिवि ॥३॥ त्रिपादूर्ध्वऽउदैत्पुरुषः
पादोस्येहाभवत्पुनः ॥ ततोव्विष्वङ्-
व्यक्रामत्साशनानशनेऽअभि ॥४॥ ततो
व्विराडजायत व्विराजोऽअधिपूरुषः ।
सजातोऽअत्यरिच्यतपश्चाद्भूमि-
मथोपुरः ॥५॥ तस्माद्यज्ञात्सर्व्वहुतः
सम्भृतम्पृषदाज्ज्यम् ॥ पशूँस्ताँश्चक्रे
व्वायव्व्यानारण्यान्ग्राम्म्याश्च ये ॥६॥
तस्माद्यज्ञात्सर्व्वहुतऽऋचः सामानि
जज्ञिरे ॥ छन्दांसिजज्ञिरेतस्म्माद्यजु-
स्तस्म्मादजायत ॥७॥ तस्म्मादश्वा-
ऽअजायन्त ये के चोभयादतः ॥
गावोहजज्ञिरेतस्म्मात्तस्माज्जाताऽ-
अजावयः ॥८॥ तं यज्ञम्बर्हिषिप्रौ-
क्षन्पुरुषञ्जातमग्रतः ॥ तेनदेवा-

ऽअयजन्तसाद्ध्याऽऋषयश्श्चये ॥९॥
यत्पुरुषं व्ययदधु ॰ कतिधा व्व्यकल्प्प-
यन् ॥ मुखङ्किमस्यासीत्किम्बाहूकि-
मूरूपादाऽउच्च्येते ॥१०॥ ब्ब्राह्मणोस्य
मुखमासीद्बाहूराजन्न्य÷ कृत ः ॥ऊरुत-
दस्ययद्वैश्यं÷ पद्भ्या ं शूद्रोऽअ-
जायत ॥११॥ चन्द्रमामनसो जात-
श्श्चक्षो ः सूर्य्योऽअजायत ॥ श्श्रोत्त्रा-
द्वायुश्श्चप्राणश्श्चमुखादग्निरजा-
यत ॥१२॥ नाभ्भ्याऽआसीदन्तरिक्ष
ः शीष्ण्र्णोद्यौ ः समवर्त्तत ॥ पद्भ्या-
म्भूमिर्द्दिश ः श्श्रोत्त्रात्तथालोकाँ २
अकल्प्पयन् ॥१३॥ यत्पुरुषेणहविषा
देवायज्ञमतन्न्वत ॥ व्वसन्तोऽस्या सीदा-
ज्ज्यंङ्ग्रीष्ममऽइध्म ः शरद्धवि ः ॥१४॥
सप्प्तास्यासन्परिधयस्त्रि ः सप्प्तसमिध÷

कृता॒ ॥ दे॒वा य॒द्यज्ञन्तन्वा॒नाऽअबध्न॒-न्पुरुषम्प॒शुम् ॥१५॥ य॒ज्ञेन यज्ञमय-जन्तदे॒वास्तानि॒धर्म्माणिप्रथ॒मान्या-सन् ॥ तेह॒ नाकम्महि॒मानः॑सचन्त॒ यत्र॒पूर्व्वेसा॒द्ध्याः॑ सन्ति॒ दे॒वाः॑ ॥१६॥ अ॒द्भ्यः॑ सम्भृतः॑ पृथि॒व्यैरसाच्च व्वि॒श्वकर्म्मणः॑ सम॑वर्त्त॒ताग्रे॑ ॥ तस्य॒त्त्वष्टा व्वि॒दधद्रू॒पमेति॒तन्मर्त्यस्य-दे॒वत्वमा॒जान॒मग्रे॑ ॥१७॥ व्वेदा॒हमे॒तं पुरुषं म॒हान्तमादि॒त्यवर्ण्णन्तमसः॑ प॒रस्तात्॑ ॥ त॒मेवव्विदित्त्वातिमृ॒त्यु-मेति॒नान्यः॑ पन्थाव्विद्यते॒ ऽयनाय ॥१८॥ प्र॒जापतिश्चरति॒गर्ब्भेऽअ॒न्तरजाय मानो बहु॒धाव्विजायते ॥ तस्य॒ योनि॒म्परि पश्यन्ति॒ धीरास्तस्मिन्हत॒स्त्थु॒र्भुवनानि॒ व्विश्वा ॥१९॥ यो दे॒वेभ्य॒ऽआ॒तपति॒-

योदेवानाम्पुरोहित ं ॥ पूर्व्वोयोदेवे-
ब्भ्योजातोनमोरुचायब्ब्राह्मये ॥२०॥
रुचम्ब्राह्मञ्जनयन्तोदेवाऽअग्ग्रेतदब्रु-
वन् ॥ यस्त्वैवम्ब्राह्मणो विद्यात्तस्य-
देवाऽ असन्वशे ॥२१॥ श्रीश्श्चतेलक्ष्मी-
श्श्चपत्न्या वहोरात्रेपाश्र्वेनक्षत्राणि
रूपमश्विनौ व्व्यात्तम् ॥इष्णान्निषाणा-
मुम्मऽइषाण सर्व्वलोकम्मऽइषाण॥२२॥

इति रुद्रे द्वितीयोऽध्याय: ॥२॥

अथ तृतीयोऽध्याय:

हरि: ॐ ॥ आशु ? शिशानो-
व्वृषभोनभीमो घनाघन ; क्षोभ-
णश्चर्षणीनाम् ॥ सङ्क्रन्दनोनिमिषऽ-
एकवीर ? शत ं सेनाऽअजयत्साक-
मिन्द्र: ॥१॥ सङ्कन्दनेना निमिषेण
जिष्णुनायुत्कारेणदुश्च्यवनेन धृष्णुना ॥

तदिन्द्रेण जयतत्त्सहद्ध्वंय्युधोन-
रऽइषुहस्तेनव्वृष्णा ॥२॥ सऽइषुहस्तैः
सनिषङ्गिभिर्व्वशीसꣳ स्त्रष्टासयुधऽइंद्रो-
गणेन ॥ सꣳ सृष्ट जित्त्सोमपाबाहु-
शर्द्ध्युग्ग्रधन्न्वाप्प्रतिहिताभिरस्ता ॥३॥
बृहस्प्पतेपरिदीयारथेनरक्षोहामित्त्राँ २
ऽअपबाधमानꣳ ॥ प्प्रभञ्जन्त्सेनाꣳ
प्प्रमृणोयुधाजयन्नस्म्माकमेदव्ध्य विता-
रथानाम् ॥४॥ बलविज्ञायस्त्थ विरꣳ
प्प्रवीरꣳ सहस्वान्वाजीसहमानऽउग्ग्रः ॥
अभिवीरोऽअभिसत्त्वासहोजाजैत्त्रमिन्द्रर-
थमातिष्ठ गोवित् ॥५॥ गोत्त्रभिदङ्गो-
विदंव्वज्ज्रबाहुञ्जयन्त्त मज्ज्मप्प्रमृण-
न्त्तमोजसा ॥ इमꣳ सजाताऽअनुवीर-
यद्ध्वमिन्द्रꣳ सखायोऽअसनुसꣳ
रभद्ध्वम् ॥६॥ अभिगोत्त्राणि

सहसागाहमानो दयोवीर ? शतमन्न्यु-
रिन्द्रः ॥ दुश्च्यवन ? पृतनाषाडयु-
द्ध्योस्माक ६ सेनाऽअवतुप्प्रयुत्सु ॥७॥
इन्द्रऽआसान्नेता बृहस्प्पतिर्द्दक्षिणायज्ञ ६
पुरऽएतु सोमः ॥ देवसेनानामभिभ-
ञ्जतीनाञ्जयन्तीनां मरुतोयन्त्वग्ग्रम् ॥८॥
इंद्रस्यव्वृष्ष्णो व्वरुणस्य राज्ञ-
ऽआदित्यानाम्मरुता ६ शर्द्धऽउग्ग्रम् ॥
महामनसाम्भुवनच्च्यवानाङ्घोषोदेवानाञ्जय-
तामुदस्त्थात् ॥९॥ उद्धर्षयमघवन्ना-
युधान्न्युत्सत्त्वनाम्मामकानांमना ६ सि ॥
उद्वृत्त्रहन्वाजिनांव्वाजिनान्न्युद्रथाना-
ञ्जयतांय्यन्तुघोषाः॥१०॥ अस्माकमिन्द्र
६ समृतेषुध्वजेष्ष्वस्माकंय्याऽइषवस्ता-
जयन्तु ॥ अस्म्माकंव्वीराऽउत्तरेभव-
न्त्वस्माँ २ ऽउदेवा ऽअवताहवेषु ॥११॥

अमीषाञ्चित्तं प्रतिलोभयन्ती गृहाणा-
ङ्गान्यप्वेपरेहि ॥ अभिप्रेहि निर्दहहृत्सु-
शोकैरन्धेनामित्रास्तमसा सचन्ताम्
॥१२॥ अवसृष्टापरापतशरव्येब्रह्मसं-
ऽ शिते ॥ गच्छांमित्त्रान्प्रपद्यस्वमामी-
षाङ्कञ्चनोच्छिषः ॥१३॥ प्रेताजयतान-
रइन्द्रोवः शर्म्मयच्छतु ॥ उग्गावः
सन्तुबाहवोना धृष्ष्यायथासथ ॥१४॥
असौ या सेना मरुतःपरेषामभ्ध्ये
तिनऽओजसास्पर्द्धमाना ॥ ताङ्गूहत-
तमसापव्रतेन यथामी अन्योऽ अन्यन्न
जानन् ॥१५॥ यत्रबाणाः सम्पतन्ति
कुमारा विशिखाऽइव ॥ तन्नऽइन्द्रो-
बृहस्पतिरदितिः शर्म्म यच्छतु
विश्श्वाहाशर्म्म यच्छतु ॥१६॥
मर्म्माणितेव्वर्म्मणाच्छादयामिसोमस्त्व

राजामृतेनानुवस्ताम् ॥ उरोर्व्वरीयो-
व्वरुणस्ते कृणोतु जयन्तन्त्वानु देवा मं
दन्तु ॥१७॥

इति रुद्रे तृतीयोऽध्यायः ॥३॥

अथ चतुर्थोऽध्यायः

हरिः ॐ ॥ व्विब्भ्राड्बृहत्पिबतु-
सोम्म्यम्मद्ध्वायुर्द्दधद्यज्ञपता वविर्हु-
तम् ॥ व्वातजूतोयोऽअभिरक्षतित्मना-
प्प्रजाः पुपोषपुरुधा व्विराजति ॥१॥
उदुत्यञ्जातवेदसन्देवंव्वहन्ति केतवः
दृशेव्विश्श्वायसूर्य्यम् ॥२॥ येनापावक
चक्षसाभुरण्यन्तञ्जनाँ २॥ ऽअनु ॥ त्वं
व्वरुण पश्यसि ॥३॥ दैव्व्या बद्ध्व-
र्य्यूऽआगत ६ रथेन सूर्य्यत्वचा ॥
मद्ध्वायज्ञ ६ समञ्जाथे ॥ तम्प्रत्क्कथा
यंव्वेनश्चित्त्रन्देवानाम् ॥४॥ तम्प्रत्क्कथा

पूर्व्वथा विश्वथेमथाज्ज्येष्ठता-
तिम्बर्हिषदं स्वर्व्विदम् ॥ प्रतीचीनं
व्वृजनन्दोहसेधुनिमाशुञ्जयन्तमनु-
यासुव्वर्द्धसे ॥५॥ अयंव्वेनश्चोदय-
त्पृश्निगर्ब्भाज्ज्योतिर्ज्जरायूरजसो-
व्विमाने ॥ इममपांसङ्गमे सूर्य्यस्य
शिशुन्नविप्प्रामतिभीरिहन्ति ॥६॥
चित्रन्देवानामुदगादनीकञ्चक्षुर्मि-
त्रस्यव्वरुणस्याग्नेः ॥ आप्प्राद्या-
वापृथिवीऽअन्तरिक्षः सूर्य्यऽआत्मा
जगतस्तस्थुषश्च ॥७॥ आनऽइडाभि-
र्व्विदथेसुशस्तिव्विश्वानरः सवितादेव-
ऽएतु ॥ अपियथा युवानोमत्सथानो-
व्विश्वञ्जगदभिपित्त्वे मनीषा ॥८॥
यदद्यकच्चव्वृत्रहन्नुदगाऽअभिसूर्य्य ॥
सर्व्वन्तदिन्द्रतेव्वशे ॥९॥ तरणिर्व्विश्व-

दर्शतोज्ज्योतिष्कृदसिसूर्य्य ॥ विश्श्व-
माभासिरोचनम् ॥१०॥ तत्सूर्य्यस्य देव-
त्वन्तन्महित्वम्मद्ध्याकर्त्तोर्व्वितत ६
सञ्जभार ॥ यदेदयुक्त हरितः सधस्त्था-
दाद्रात्त्री वासस्तनुतेसिमसम्मै ॥११॥
तन्मित्त्रस्यव्वरुणस्याभिचक्षेसूर्य्यो-
रूपङ्कृणुतेद्योरुपस्त्थे ॥ अनन्त
मन्न्यदर्द्दुशदस्यपाजः कृष्ष्णमन्न्यद्धरितः
सम्भरन्ति ॥१२॥ बण्णमहाँ २॥ ऽअसि
सूर्य्य बडादित्त्यमहाँ २॥ ऽअसि ॥ महस्ते
सतो महिमा पनस्यतेद्धादेवमहाँ २॥
ऽअसि ॥१३॥ बट्सूर्य्यश्रवसामहाँ २॥
ऽअसि सत्त्रा देवमहाँ २॥ ऽअसि ॥
मन्हादेवानामसुर्य्यः पुरोहितौव्विभु-
ज्ज्योतिरिदाब्भ्यम् ॥१४॥ श्रायन्ताऽइव
सूर्य्यं विश्श्वेदिन्द्रस्य भक्षत ॥ व्वसूनि-

जाते जनमानऽओजसाप्प्रतिभागन्न-
दीधिम ॥१५॥ अद्यादेवाऽउदिता
सूर्य्यस्य निरꣳहसः पिपृतानिरवद्यात् ॥
तन्नो मित्त्रो व्वरुणोमामहन्तामदितिꣳ
सिन्धुः पृथिवीऽउतद्यौः ॥१६॥ आ
कृष्णेनरजसाव्वर्त्तमानो निवेशयन्न-
मृतम्मर्त्यञ्च ॥ हिरण्ययेनसवितारथेना
देवो यातिभुवनानि पश्यन् ॥१७॥

इति रुद्रे चतुर्थोऽध्यायः ॥४॥

अथ पञ्चमोऽध्यायः

हरिः ॐ॥ नमस्तेरुद्द्रमन्न्यवऽउतो
तऽइषवेनमः बाहुब्भ्यामुत ते नमः ॥१॥
या तेरुद्द्र शिवातनूरघोरापापकाशिनी ॥
तयानस्तन्न्वा शन्तमयागिरिशन्ताभिचा
कशीहि ॥२॥ यामिषुङ्गिरि शन्तहस्ते
विभर्ष्यस्तवे ॥ शिवाङ्गिरित्रताङ्कुरु

मा हिंꣳसी ꣳ पुरुषञ्जगत् ॥३॥ शिवेन
व्वचसात्त्वा गिरिशाच्छाव्वदामसि ॥
यथानꣳ सर्व्वमिज्जगदयक्ष्मꣳ सुमनाऽ-
असत् ॥४॥ अद्ध्यवोचदधिवक्ता-
प्प्रथमोदैव्व्यो भिषक् ॥ अहींश्चसर्वा-
ञ्जम्भयन्त्सर्व्वाँश्चयातुधान्न्योधराचीꣳ
परासुव ॥५॥ असौयस्ताम्म्रोऽअरुण-
ऽउतबब्भ्रुꣳ सुमङ्गलः ॥ ये चैनꣳ
रुद्द्राऽअभितोदिक्षुश्रिताः सहस्र-
शोवैषाꣳ हेडऽईमहे ॥६॥ असौ
योऽवसर्प्पति नीलग्ग्रीवो व्विलोहितः ॥
उतैनङ्गोपाऽअदृश्श्रन्नदृश्श्रन्नुदहार्य्यः
ꣳ सदृष्ट्वोमृडयातिनꣳ ॥७॥ नमोऽस्तु
नीलग्ग्रीवायसहस्राक्षायमीढुषे ॥
अथोयेऽअस्य सत्त्वानोऽहन्तेब्भ्योऽ
करन्नमः ॥८॥ प्प्रमुञ्च धन्न्वनस्त्वमुभयो

रात्न्योंज्ज्यीम् ॥ याश्चतेहस्तऽइषव

परातांभगवोव्वप ॥९॥ विज्ज्यन्धनुः

कपर्द्दिनो व्विशल्ल्योबाणवाँ२ ऽउत ॥

अनेशन्नस्ययया ऽइषवऽआभुरस्यनिष-

ङ्गधि ? ॥१०॥ या तैहेतिम्मींढुष्टमऽहस्ते

बभूवतेधनुः ॥ तयास्म्मान्विश्श्व-

तस्त्वमयक्ष्म्मया परिभुज ॥११॥ परिते-

धन्न्वनोहेतिरस्म्मान्न्वृणक्तुव्विश्श्वतः ॥

अथो यऽइषुधिस्तवारेऽअस्म्मन्निधे-

हितम् ॥१२॥ अवतत्त्यधनुष्ट्व ँ

सहस्राक्षशतेषुधे ॥ निशीर्य्यशल्ल्याना-

म्मुखा शिवो नः सुमना भव ॥१३॥

नमस्तऽआयुधायानातताय धृष्ष्णवे ॥

उभाब्भ्यामुततेनमोबाहुब्भ्यान्त वधन्न्वने

॥१४॥ मानो महान्तमुतमानोऽअर्ब्भ-

कम्मा नऽउक्षन्तमुत मा नऽउक्षितम् ॥ मा

नो व्वधी ँ पितरम्मोत मातरम्मानः
प्प्रियास्तन्न्वोरुद्द्ररीरिष ँ ॥१५॥
मानस्तोके तनये मा नऽआयुषि मा नो
गोषु मा नोऽअश्श्वेषुरीरिष ँ॥ मा नोव्वीरा
न्नुद्द्रभामिनोव्वधीर्हे विषम्मन्त ँ ॥
सदमित्त्वा हवामहे ॥१६॥ नमो
हिरण्ण्यबाहवे । सेनान्न्ये दिशाञ्चपतये
नमोनमोव्वृक्षेब्भ्यो हरिकेशेब्भ्य ँ
पशूनाम्पतयेनमो नमः ॥ शष्प्पि-
ञ्जरायत्त्विषीमते पथीनाम्पतये नमो नमो
हरिकेशायो पवीतिनेपुष्टानाम्पतये नमो
नमो बब्भ्लुशाय॥१७॥ नमोबब्भ्लुशाय।
व्व्याधिनेन्नानाम्पतये नमो नमो भवस्य
हेत्त्यैजगताम्पतये नमोनमोरुद्द्रायाा
ततायिनेक्षेत्त्राणाम्पतये नमो नमः
सूतायाहन्त्येव्वनानाम्पतये नमोनमोरो-

हिताय ॥१८॥ नमो रोहितायस्थपत-
येव्वृक्षाणाम्पतये नमो नमो भुवन्तये
वारिवस्कृतायोषधीनाम्पतये नमो
नमोमन्त्रिणेवाणिजाय कक्षाणाम्पतये
नमो नमऽउच्चैर्घोषायाक्क्रन्दय ते
पत्तीनाम्पतये नमो नमः कृत्स्ना-
यतया ॥१९॥ नमः कृत्स्नायतया ॥
धावते सत्त्वनाम्पतये नमो नमः
सहमानाय निव्व्याधिनऽआव्याधिनी
नाम्पतये नमो नमो निषङ्गिणेककुभा-
यस्तेनानाम्पतये नमोनमोनिचेरवेपरिच
रायारण्ण्यानाम्पतये नमोनमोव्वञ्चते
॥२०॥ नमोव्वञ्चते । परिव्वञ्चतेस्तायू-
नाम्पतये नमोनमो निषङ्गिणऽइषुधिमते
तस्क्कराणाम्पतये नमो नमः
सृकायिब्भ्योजिघांᳪसद्भ्यो मुष्ण-

ताम्पतयेनमो नमो सिमद्भ्योनक्त-
ञ्चरद्भ्यो विकृन्तानाम्पतये
नमः ॥२१॥ नमऽउष्णीषिणे ॥ गिरिच-
रायकुलुञ्चानाम्पतये नमो नमऽइषु
मद्भ्योधन्वायिभ्यश्च वो नमोनमऽ
आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो
नमोनमऽआयच्छद्भ्यो स्यद्भ्यश्चवोनमो
नमो विसृजद्भ्यः ॥२२॥ नमोवि-
सृजद्भ्योविध्यद्भ्यश्च वो नमो नमः
स्वपद्भ्यो जाग्रद्भ्यश्चवोनमोनमः
शयानेभ्यऽआसीनेभ्यश्च वो
नमोनमस्तिष्ठद्भ्योधावद्भ्यश्चवो नमो
नमः सभाभ्यः ॥२३॥ नमः
सभाभ्यः। सभापतिभ्यश्चवोनमो-
नमोऽश्वेभ्योऽश्वपतिभ्यश्चवोनमो
नमऽआव्याधिनीभ्यो विविध्यन्ती-

भ्यश्च्श्च्वो नमोनमऽउगगणाभ्यस्तृ हतीभ्यश्च्श्च्वो नमोनमोगणेभ्य÷ ॥२४॥

नमोगणेभ्यो । गणपतिभ्यश्च्श्च्वो नमोनमो व्व्रातेभ्योव्व्रातपतिभ्यश्च्श्च्वो नमोनमो गृत्सेभ्योगृत्सपतिभ्यश्च्श्च वो नमो नमो व्विरूपेभ्यो व्विश्वरूपेभ्यश्च्श्च्वो नमोनम ँ सेनाभ्य ँ ॥२५॥

नम ँ सेनाभ्य ँ । सेनानिभ्यश्च्श्च्वोनमोनमो रथिभ्योऽअरथेभ्यश्च्श्च वो नमो नम÷ क्षत्तृभ्य÷सङ्ग्रहीतृभ्यश्च्श्च वो नमो नमो महद्भ्योऽअर्भकेभ्यश्च्श्च वो नम÷ ॥२६॥

नमस्तक्षभ्यो । रथकारेभ्यश्च्श्च्वो नमो नम ँ कुलालेभ्य ँ कर्म्मारेभ्यश्च्श्च वो नमो नमो निषादेभ्य÷पुञ्जिष्ठेभ्यश्च्श्च्वो नमो नम÷श्वनिभ्योमृग-

युब्भ्यश्श्च वो नमो नम ᳚ श्वब्भ्य॑: ॥२७॥
नम ᳚ श्श्वब्भ्य॒: । श्वपतिब्भ्यश्श्च वोन-
मोनमोभवायचरुद्रायचनम॑: शर्व्वाय
चपशुपतयेचनमोनीलग्ग्रीवाय-
चशितिकण्ठायचनम॑: कपर्द्दिने ॥२८॥
नम॑:कपर्द्दिने । चव्व्युप्तकेशायचनम॑:
सहस्राक्षायच शतधन्न्वनेचनमोगिरि-
शयाय च शिपिविष्टायच नमो मीढुष्ट्ट-
मायचेषुमते च नमो ह्रस्वाय ॥२९॥ नमो
ह्रस्वाय । चव्वामनायच नमोबृहते-
चव्वर्षीयसे च नमोवृद्धाय च सवृधे च
नमोग्ग्र्यायच प्प्रथमायचनमऽ-
आशवे ॥३०॥ नमऽआशवे । चाजि-
रायच नम ᳚ शीग्घ्र्याय च शीब्भ्याय च
नमऽऊम्म्र्यायचावस्वन्न्याय च
नमोनादेयायचद्वीप्प्यायच ॥३१॥

नमोऽज्ज्येष्ठाय च कनिष्ठाय च नमः पूर्व्वजाय चापरजाय च नमो मद्ध्यमाय चापगल्भाय च नमो जघन्न्याय च बुध्न्याय च नमः सोभ्याय ॥३२॥ नमः सोभ्याय। च प्प्रतिसर्य्याय च नमो याम्म्याय च क्षेम्म्याय च नमः श्लोक्याय चावसान्न्याय च नमऽउर्व्वर्य्याय च खल्ल्याय च नमो वन्न्याय ॥३३॥ नमो वन्न्याय। च कक्ष्याय च नमः श्रवाय च प्प्रतिश्रवाय च नमऽआशुषेणाय चाशुरथाय च नमः शूराय चावभेदिने च नमो बिल्मिने ॥३४॥ नमो बिल्मिने। च कवचिने च नमो वर्म्मिणे च वरूथिने च नमः श्श्रुताय च श्श्रुतसेनाय च नमो दुन्दुभ्याय चाहनन्न्याय च नमो धृष्ष्णवे ॥३५॥ नमो धृष्ष्णवे।

चप्प्रमृशाय॑ च॒ नमो॑ निष॒ङ्गिणे॑चेषु-
धि॒मते॑च॒नम॑स्ती॒क्ष्णेष॑वे चायु॒धिने॑च
नम॑ःस्वायु॒धाय॑ च सु॒धन्व॑नेच ॥३६॥
नम॒ऽस्रु॒त्या॑य । चप॒थ्या॑यचन॒म॒ऽ
काट्या॑य च नीप्प्या॑यच॒नम॒ऽकूल्ल्या॑य
च सर॒स्या॑यच॒नमो॑नाद्॒याय॑ च
वैश॒न्ता॑य॑ च॒ नम॒ऽ कूप्प्या॑य ॥३७॥ नम॒
ऽकूप्प्या॑य चाव॒ट्ट्या॑यच॒नमो॑ व्वीद्ध्र्या॑य
चात॒प्प्या॑यच॒नम॒ो मेग्घ्या॑यच व्विद्द्यु-
त्या॑य च॒ नम॒ो व्वर्ष्या॑यचाव॒र्ष्या॑य
च॒नमो व्वात्या॑य ॥३८॥ नम॒ो व्वात्या॑य ।
च॒रेष्म्या॑यच॒नमो॑ व्वास्तव्व्या॑यचवा-
स्तुपाय॑च॒ नम॒ऽ सोमा॑ यचरुद्द्राय॑च॒
नम॑स्ता॒म्म्राय॑चारु॒णाय॑च॒ नम॑ः शङ्ग॑वे
॥३९॥ नम॑ः श॒ङ्गवे॑ । चपशु॒पत॑येच॒नम॑
ऽउग्ग्राय॑चभी॒माय॑च॒ नमो॑ग्ग्रेव॒धाय॑च-

दूरेवधायचनमोहन्त्रेचहनीयसेचनमोवृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय ॥४०॥ नमः शम्भवाय । चमयोभवायचनमः शङ्-करायचमयस्करायचनमः शिवाय-चशिवतराय च ॥४१॥ नमः पार्य्याय । चावार्य्याय च नमः प्रतरणाय चोत्त-रणायच नमस्तीर्त्थ्यायच कूल्ल्याय-चनमः शष्प्यायचफेन्न्यायच नमः सिकत्त्याय ॥४२॥ नमः सिकत्याय । चप्रवाह्य्यायच नमः किꣳ शिलायच-क्षयणायचनमः कपर्द्दिनेचपुलस्तये च नमऽइरिण्याय चप्रपत्थ्यायच नमोव्व्र-ज्ज्याय ॥४३॥ नमो व्व्रज्ज्याय । चगोष्ठ्यायच नमस्तल्प्यायचगेह्-यायचनमो हृदय्यायच निवेष्प्याय च नमः काट्ट्यायचगह्वरेष्ठायच नमः

शुष्क्याय ॥४४॥ नम॑ः शुष्क्याय । चहरित्यायच नम॑ः पा ंसव्व्याय चरजस्यायच नमोलोप्प्याय चोलप्प्या- यचनमऽऊर्व्व्यायचसूर्व्व्यायचनम॑ः पर्णाय ॥४५॥ नम॑ः पर्णाय । चपर्णशदायचनमऽउद्गुरमाणाय चाभिघ्नेतचनमऽआखिदतेचप्प्रखिदते च नम॑ऽइषुकृद्भ्योधनुष्कृद्भ्यश्श्चवो- नमोनमोव ः किरिकेभ्योदेवाना ः हृदयेभ्योनमोव्विचिन्वत्केभ्योनमोव्वि क्षिणत्केभ्योनमऽआनिर्हतेभ्य॑ः ॥४६॥ द्रापेऽअन्धसस्प्पते दरिद्रनीललोहित ॥ आसाम्प्रजानामेषाम्पशूनाम्माभेर्म्मारोङ्मोच नः किञ्चनाममत् ॥४७॥ इमारुद्राय । तवसेकपर्द्दिनेक्षयद्वीरायप्रभरामहेमती ः ॥ यथाशमसद्द्विपदे चतुष्प्पदेव्वि-

श्वम्पुष्टङ्ग्रामेऽअस्मिन्ननातुरम् ॥४८॥
यातेरुद्द्रशिवातनू ; शिवाव्विश्श्वाहा
भेषजी ॥ शिवारुतस्यभेषजी तयानो
मृडजीवसे ॥४९॥ परिनोरुद्द्रस्यहेति-
र्व्वृर्णक्तुपरित्वेषस्यदुर्म्मतिरघायो ः ॥
अवस्त्थिरामघवद्भ्यस्तनुष्व्वमीढ्-
वस्तोकायतनयायमृड ॥५०॥ मीढु-
ष्टमशिवतम । शिवोनः सुमनाभव ॥
परमेव्वृक्षऽआयुधन्निधायकृत्तिंव्वसान
ऽआचरपिनाकम्बिभ्रदागहि ॥५१॥
व्विकिरिद्द्रव्विलोहित । नमस्तेऽअस्तु-
भगवः ॥ यास्ते सहस्त्रः हेतयोन्न्य-
मस्म्मन्निवपन्तुताः ॥५२॥ सहस्त्राणि-
सहस्त्रशोबाह्वोस्तव हेतयः ॥
तासामीशानोभगवः पराचीना मुखा-
कृधि ॥५३॥ असङ्ख्यातासहस्त्राणि

येरुद्द्राऽअधिभूम्म्याम् ॥ तेषा

ꣳसहस्त्रयोजनेवधन्न्वानितन्न्मसि ॥५४॥

अस्म्मिन्न्महत्त्यर्णण्र्णवेन्तरिक्षेभवाऽअधि ॥

तेषाꣳ सहस्त्रयोजनेवधन्न्वानि-

तन्न्मसि ॥५५॥ नीलग्ग्रीवाः शिति-

कण्ठादिवꣳ रुद्द्राऽउपश्शिश्रताः ॥ तेषाꣳ

सहस्त्रयोजनेवधन्न्वानितन्न्मसि ॥५६॥

नीलग्ग्रीवाः शितिकण्ठाः शर्व्वाऽअ-

धःक्षमाचराः ॥ तेषाꣳ सहस्त्रयोजनेव-

धन्न्वानितन्न्मसि ॥५७॥ येव्वृक्षेषु-

शष्प्पिञ्ज्जरा नीलग्ग्रीवाव्विलोहिताः ॥

तेषाꣳ सहस्त्रयोजनेवधन्न्वानित-

न्न्मसि ॥५८॥ ये भूतानामधिप-

तयोव्विशिखासः कपर्द्दिनः तेषाꣳ ।

सहस्त्रयोजनेवधन्न्वानितन्न्मसि ॥५९॥

येपथाम्पथिरक्षयऽऐलवृदाऽआयुर्य्युधः ॥

तेषाꣳ सहस्त्रयोजनेवधन्न्वानि-
तन्न्मसि ॥६०॥ ये तीर्त्थानि ।
प्प्रचरन्तिसृकाहस्तानिषङ्गिणः ॥ तेषाꣳ
सहस्त्रयोजनेवधन्न्वानितन्न्मसि ॥६१॥
येन्न्नेषु । व्विविद्ध्यन्ति पात्त्रेषु पिबतो
जनान् ॥ तेषाꣳ सहस्त्रयोजनेवध-
न्न्वानितन्न्मसि ॥६२॥ यऽएतावन्तश्श्च
भूयाꣳ सश्श्चदिशोरुद्द्राव्वितस्त्थिरे ॥
तेषाꣳ सहस्त्रयोजनेवधन्न्वानितन्न्मसि॥६३॥
नमोस्तु । रुद्द्रेब्भ्योये दिवि-
येषांव्वर्षमिषवः ॥ तेब्भ्यो दशप्प्रा
चीर्द्दशदक्षिणा दशप्प्रतीचीर्द्दशोदी-
चीर्द्दशोद्ध्वाः ॥ तेब्भ्योनमोऽअस्तुते
नोव्वन्तुते नोमृडयन्तुतेयन्द्विष्म्मो
यश्श्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ॥६४॥
नमोस्तुरुद्द्रेब्भ्यो येन्तरिक्षे येषां व्वातऽ-

ईषवः ॥ तेभ्योदशप्प्राचीर्द्दशदक्षिणा
दशप्प्रतीचीर्द्दशोदीचीर्द्दशोर्द्ध्वाः ॥
तेभ्यो नमोऽअस्तु ते नोऽव्वन्तु ते
नोमृडयन्तुतेयन्द्विष्मो य्यश्श्चनोद्वेष्टि-
तमेषाञ्जम्भेदध्मः ॥६५॥ नमोस्तु ।
रुद्द्रेभ्यो येपृथिव्व्यां य्येषामन्नमिषवः।
तेभ्योदशप्प्राचीर्द्दशदक्षिणा दशप्प्रती-
चीर्द्दशोदीचीर्द्दशोर्द्ध्वाः । तेभ्योनमो-
ऽअस्तु ते नोवन्तु ते नोमृडयन्तु ते
यन्द्विष्मो यश्च्चनोद्वेष्टितमेषा-
ञ्जम्भेदध्मः ॥६६॥

इति रुद्रेपञ्चमोऽध्यायः ॥५॥

यदि आप शतरुद्री का पाठ करना चाहते हैं तो कृपया इसके बाद पुनः १६ मंत्रों का पाठ करके परिशिष्ट नं. ६ पृष्ठ नं. १९२ से शतरुद्री का पाठ कर सकते हैं।

❖

अथ षष्ठोऽध्यायः

हरिः ॐ ॥ व्वयᳪं सोम व्व्रते तव मनस्तनूषुबिब्भ्रतः ॥ प्रजावन्तः सचेमहि ॥१॥ एषते । रुद्द्रभागः सहस्वस्राम्बिकया तञ्जुषस्वस्वाहै षतेरुदद्रभागऽआखुस्तेपशुः ॥२॥ अव रुदद्रमदीमह्यव देवन्त्र्यम्बकम् ॥ यथानो व्वस्यं सस्क्करद्द्यथानः श्श्रेयस-स्क्करद्यथानो व्यवसाययात् ॥३॥ भेषजमसि भेषजङ्गवेश्श्वाय पुरुषाय भेषजम् ॥ सुखम्मेषाय मेष्यै ॥४॥ त्र्यं-म्बकंय्यजामहे । सुगन्धिम्पुष्टिवर्द्धनम् । उर्व्वारुकमिव बन्धनान्मृत्योर्म्मुक्षीय मामृतात् ॥ त्र्यम्बकंय्यजामहे सुगन्धि-म्पतिवेदनम् ॥ उर्व्वारुकमिव बन्धना-दितो मुक्षीय मामुतः ॥५॥ एतत्ते ।

रुद्द्रावसन्तेन परो मूजवतोतीहि ॥ अवततधन्वा पिनाकावसꣳ कृत्तिवासाऽअहिꣳसन्नꣳ शिवोतीहि ॥६॥ त्र्यायुषञ्जमदग्नेꣳ कश्यपस्यत्र्यायुषम् । यद्देवेषु त्र्यायुषन्तन्नोऽअस्तु त्र्यायुषम् ॥७॥ शिवोनामासि स्वधितिस्ते पिता नमस्तेऽअस्तुमामाहिꣳसीꣳ ॥ निर्वर्त्तयाम्यायुषेन्नाद्यायप्प्रजननायरायस्पोषाय सुप्प्रजास्त्वाय सुवीर्य्याय ॥८॥

इति रुद्रेषष्ठोऽध्यायः ॥६॥

अथ सप्तमोऽध्यायः

हरिꣳ ॐ ॥ उग्रश्च । भीमश्चद्ध्वान्तश्चधुनिश्च । सासह्वाँश्चाभियुग्वाचविक्षिपꣳ स्वाहा ॥१॥ अग्निꣳ हृदयेनाशनिꣳ हृदयाग्ग्रेणपशुपतिङ्कृत्स्नहृदयेन भवं य्यक्ना ॥ शर्व्वम्मतस्न्ना-

ब्भ्यामीशानम्मन्न्युना महादेवमन्त ः पर्शव्व्योनोग्ग्रन्देवंव्वनिष्ठुनाव्वि- सिष्ठुहनु ः शिङ्गीनिकोश्याब्भ्याम् ॥२॥ उग्गँल्लोहितेन मित्र ः सोव्व्रत्येनरुद्र- न्दौव्व्रत्येनेन्द्रम्प्रक्क्रीडेनमरुतो बलेन साद्ध्यान्प्रमुदा ॥ भवस्य कण्ठ्यं ः रुद्द्रस्यान्त ः पार्श्व्यम्महादेवस्य यकृ- च्छर्व्वस्यव्वनिष्ठुः पशुपतेः पुरीतत् ॥३॥ लोमब्भ्य ः स्वाहा ॥ लोमब्भ्य ः स्वाहा त्वचेस्वाहा त्वचेस्वाहा लोहिताय स्वाहा लोहितायस्वाहा मेदोब्भ्य ः स्वाहा मेदोब्भ्य ः स्वाहा । माᳬसेब्भ्य ः स्वाहा माᳬसेब्भ्य ः स्वाहास्नावब्भ्य ः स्वाहा स्नावब्भ्य ः स्वाहा स्त्थब्भ्य ः स्वाहास्त्थब्भ्यःस्वाहा मज्जब्भ्य ः स्वाहा मज्जब्भ्य स्वाहा ॥ रैतसेस्वाहा पायवे

स्वाहा ॥४॥ आयासायस्वाहा प्प्रायासायस्वाहा संय्यासायस्वाहा व्वियासाय स्वाहोद्यासाय स्वाहा ॥ शुचे स्वाहा शोचतेस्वाहा शोचमानाय स्वाहा शोकाय स्वाहा ॥५॥ तपसे स्वाहा । तप्प्यते स्वाहा तप्प्यमानायस्वाहा तप्प्ताय स्वाहा घर्म्माय स्वाहा । निष्कृत्त्यै स्वाहा प्प्रायश्चित्त्यै स्वाहा भेषजायस्वाहा ॥६॥ यमाय स्वाहान्तकाय स्वाहा मृत्यवे स्वाहा ॥ ब्ब्रह्मणेस्वाहा ब्ब्रह्महत्यायै स्वाहा व्विश्वेब्भ्योदेवेब्भ्य ं स्वाहा द्यावापृथिवीब्भ्या ं स्वाहा ॥७॥

इति रुद्रे सप्तमोऽध्यायः ॥७॥

अथाष्टमोऽध्यायः

हरिः ॐ ॥ व्वाजश्च ।

मेप्रसवश्चमेप्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रवश्च मे श्श्रुतिश्च मे ज्ज्योतिश्च मे स्वश्च मे यज्ञेनकल्प्पन्ताम् ॥१॥ प्राणश्च। मेपानश्च मे व्व्यानश्च मे सुश्च मे चित्तञ्चमऽआधीतञ्च मे व्वाक्च मे मनश्चमे चक्षुश्च्चमेश्श्रोत्रञ्चमे दक्षश्च मे बलञ्चमे यज्ञेनकल्प्पन्ताम् ॥२॥ ओचश्च। मेसहश्च्चमऽआत्मा च मे तनूश्च मे शर्म्मचमे व्वर्म्म च मेऽङ्गानिच मेस्थीनि चमे परू ᳪ षिचमेशरीराणिच मऽआयुश्चमेजराच मे यज्ञेनकल्प्प-न्ताम् ॥३॥ ज्ज्यैष्ठयञ्च ॥ मऽआधिपत्यञ्च मेमन्न्युश्चमे भामश्च मेमश्चमेम्भश्चमे जेमाच मे महिमाचमे व्वरिमाचमे प्प्रथिमाचमे व्वर्षिमा-

चमेद्द्राघिमाचमेव्वृद्धञ्चमेव्वृद्धिश्च मे यज्ञेनकल्प्पन्ताम् ॥४॥ (न. १) ॥ सत्यञ्च । मे श्रद्धा च मे जगच्चमे धनञ्चमे विश्श्वञ्चमे महश्श्चमे क्रीडाच मे मोदश्चमे जातञ्चमे जनिष्ष्यमाणञ्चमे सूक्त्तञ्चमे सुकृतञ्चमेयज्ञेनकल्प्पन्तानम् ॥५॥ ऋ तञ्च । मेमृतञ्चमेयक्ष्मञ्चमेनामयच्चमे जीवातुश्चमे दीर्घायुत्वञ्च मेऽनमित्रञ्च मेभयञ्च मे सुखञ्चमेशयनञ्चमे सूषाश्च मे सुदिनञ्च मे यज्ञेनकल्प्पन्ताम् ॥६॥ यन्ताच । मेधर्त्ता च मेक्षेमश्च मे धृतिश्चमेविव्वश्श्वञ्चमे महश्च मे संव्विच्च मे ज्ञात्रञ्च मे सूश्चमेप्रसूश्श्चमे सीरञ्चमे लयश्च मे यज्ञेनकल्पन्ताम् ॥७॥ शञ्चमे । मयश्चमे प्प्रियञ्च मेनुकामश्श्चमे कामश्चमे

सौमनसश्च्मे भगश्च मे द्द्रविणञ्च मेभद्द्रञ्चमेश्रेयश्च मे व्वसी यश्चमे यशश्च मे यज्ञेनकल्प्पन्ताम् ॥८॥ (नं. २) ॥ उर्क्कँच । मे सूनृताच मे पयश्च्च मे रसश्च्च मे घृतञ्चमे मधु च मे सग्ग्धिश्च्च मे सपीतिश्च्च मे कृषिश्च्च मे व्वृष्टिश्च मे जैत्रञ्चमऽऔद्भिद्यञ्च मे यज्ञेनकल्प्पन्ताम् ॥९॥ रयिश्च्च । मेरायश्चमे पुष्टञ्चमे पुष्टिश्च्चमे व्विभुचमे प्रभुचमे पूर्णञ्चमे पूर्णतरञ्चमे कुयवञ्चमे क्षितञ्चमे न्नञ्चमे क्षुच्चमे यज्ञेनकल्प्पन्ताम् ॥१०॥ व्वित्तञ्च । मे व्वेद्यञ्चमे भूतञ्चमे भविष्यच्चमे सुगञ्चमे सुपत्थ्यञ्चमेऽऋद्धञ्चमऽ-ऋद्धिश्च्चमे क्लृप्तञ्चमे क्लृप्तिश्च मे मतिश्चमे सुमतिश्च्चमे यज्ञेन-

कल्पन्ताम् ॥११॥ व्रीहयश्च । मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे प्रियङ्गवश्च मेऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे गोधूमाश्च मे मसूराश्च मे यज्ञेन कल्पन्ताम् ॥१२॥ (नं० ३) । अश्मा च । मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यञ्च मे यश्च मे श्यामञ्च मे लोहञ्च मे सीसञ्च मे त्रपु च मे यज्ञेन कल्पन्ताम् ॥१३॥ अग्निश्च । म आपश्च मे वीरुधश्च म ओषधयश्च मे कृष्टपच्याश्च मे कृष्टपच्याश्च मे ग्राम्याश्च मे पशव आरण्याश्च मे वित्तञ्च मे वित्तिश्च मे भूतञ्च मे भूतिश्च मे यज्ञेन कल्पन्ताम् ॥१४॥

व्वसुच । मेव्वसतिश्चमे कर्म्मचमे शक्ति-श्चमेर्त्थश्चमऽएमश्चमऽ इत्याचमे गतिश्च मे यज्ञेनकल्प्पन्ताम् ॥१५॥ (न० ४) ॥ अग्निश्च्च । मऽइन्द्रश्च्चमे सोमश्च्च मऽइन्द्रश्चमे सविताचमऽइन्द्रश्चमे सरस्वतीच मऽइन्द्रश्चमे पूषाचम-ऽइन्द्रश्चमे बृहस्प्पतिश्च मऽइन्द्रश्च मे यज्ञेनकल्प्पन्ताम् ॥१६॥ मित्रश्च । मऽइन्द्रश्चमे व्वरुणश्च्चमऽइन्द्रश्च्चमे धाताचमऽइन्द्रश्च्चमे त्वष्टाचमऽइन्द्रश-चमे मरुतश्चमऽइन्द्रश्चमे व्विश्वेचमे-देवा ऽइन्द्रश्च मे यज्ञेनकल्प्पन्ताम् ॥१७॥ पृथिवीच । मऽइन्द्रश्चमेऽन्तरिक्षञ्चम-ऽइन्द्रश्चमे द्यौश्च मऽइन्द्रश्चमे समाश्चमऽइन्द्रश्चमे नक्षत्राणि-चमऽइन्द्रश्चमे दिशश्चमऽइन्द्रश्च्च मे

यज्ञेनकल्पन्ताम् ॥१८॥ (न० ५) ॥

अꣳशुश्च । मे रश्मिश्चमेदाभ्यश्च मे धिपतिश्चमऽउपाꣳशुश्चमेऽन्तर्य्यामश्चमऽऐन्द्रवायवश्चमे मैत्रावरुणश्चमऽआश्विनश्चमे प्प्रतिप्प्रस्थानश्चमे शुक्रश्चमे मन्थीचमे यज्ञेनकल्पन्ताम् ॥१९॥ आग्रयणश्च । मे वैश्वदेवश्चमेद्ध्रुवश्चमे वैश्वानरश्चमऽऐन्द्राग्नश्चमे महावैश्वदेवश्चमे मरुत्त्वतीयाश्चमे निष्क्केवल्ल्यश्चमे सावित्रश्चमे सारस्वतश्चमे पात्क्नीवतश्चमे हारियोजनश्च मे यज्ञेनकल्पन्ताम् ॥२०॥

स्रुचश्च । मेचमसाश्च मे व्वायव्यानिचमे द्रोणकलशश्चमे ग्ग्रावाणश्चमेधिषवणेचमे पूतभृच्चमऽआधवनीयश्चमे व्वेदिश्चमे बर्हिश्चमे-

ऽवभृथश्चमे स्वगाकारश्च मे यज्ञेनकल्पन्ताम् ॥२१॥ (न० ६) अग्निश्च । मेघर्म्मश्चमेऽर्कश्चमे सूर्य्यश्चमे प्राणश्चमेऽश्वमेधश्च मे पृथिवीचमेऽदितिश्चमे दितिश्चमेद्यौ-श्चमेऽङ्गुलय ऽ शक्वरयोदिशश्च मे यज्ञेनकल्पन्ताम् ॥२२॥ व्रतञ्च । मऽऋतवश्चमे तपश्चमेसंव्व-त्सरश्चमे होरात्रे ऽउर्व्वष्ठीवे बृहद्रथन्तरेच मे यज्ञेनकल्पन्ताम् ॥२३॥ (न० ७)। एकाच । मेतिस्त्रश्चमे तिस्त्रश्च मे पञ्चचमे पञ्चचमे सप्तचमे सप्तचमे नवचमे नवचमऽएकादशचम-ऽएकादशचमे त्रयोदशचमे त्रयोदशचमे पंचदशचमे पंचदशचमे सप्तदशचमे सप्तदशचमे नवदशचमे नवदशचम-

ऽएकविंꣳ शतिश्चमऽएकविंꣳ शतिश्चमे-
त्रयोविंꣳ शतिश्चमे त्रयोविंꣳ शतिश्चमे
पंचविंꣳ शतिश्श्चमे पंचविंꣳ शतिश्चमे
सप्तविंꣳ शतिश्चमेसप्प्तविंꣳ शतिश्चमे
नवविंꣳ शतिश्चमेनवविंꣳ शतिश्च
मऽएकत्रिꣳ शच्चमऽएकत्रिꣳ
शच्चमेत्रयस्त्रिꣳ शच्चमे यज्ञेनकल्प्प-
न्ताम् ॥२४॥ (न० ८) ॥ चतस्रश्च ।
मेष्टौचमेष्टौचमे द्वादशचमे द्वादशचमे
षोडशचमे षोडशचमे विꣳ शतिश्चमे
विꣳशतिश्चमे चतुर्विꣳ शतिश्चमे
चतुर्विꣳ शतिश्चमेष्टाविꣳ शतिश्चमेष्टावि
ꣳ शतिश्चमे द्वात्रिꣳ शच्चमे द्वात्रिꣳ
शञ्च मे षट्त्रिꣳ शच्चमे षट्त्रिꣳ शच्चमे
चत्त्वारिꣳ शच्चमे चत्त्वारिꣳ शच्चमे
चतुश्श्चत्वारिꣳ शच्चमे चतुश्श्चत्वारि

ॐ शच्चमेऽष्टाचंत्त्वारि ꣳ शच्चमे यज्ञेनकल्प्पन्ताम् ॥२५॥ (न० ९) ॥ त्र्यविश्च्च । मेत्र्यवीचंमे दित्त्यवाट्चंमे दित्त्यौही चं मे पञ्चाविश्श्चमे पञ्चावीचंमे त्रिवत्त्सश्च्चंमे त्रिवत्त्साचंमे तुर्य्यवाट्चंमे तुर्य्यौहीचं मे यज्ञेनकल्प्पन्ताम् ॥२६॥ पष्ठवाट्च । मे पष्ठौहीचंमेऽउक्षाचंमे व्वशाचंमेऽ-ऋषभश्च्चंमे व्वेहच्चंमे नड्वाँश्चंमे धेनुश्चंमे यज्ञेनकल्प्पन्ताम् ॥२७॥ (न० १०) व्वाजायस्वाहा प्प्रसवायस्वाहा पिजाय स्वाहा क्रतवेस्वाहा व्वसवेस्वाहा हर्प्पतये स्वा-हाऽह्नेमुग्ग्धाय स्वाहा मुग्ग्धाय व्वैनꣳ शिनायस्वाहा व्विनꣳशिनऽ आन्त्या-यनाय स्वाहान्त्याय भौवनाय स्वाहा

भुवनस्य पतये स्वाहाधिपतये स्वाहा प्रजापतये स्वाहा ॥ इयन्तेराणिम-न्त्रायजन्तासि यमनऽऊर्ज्जेत्वावृष्ट्यैत्वा प्रजानान्त्वाधिपत्याय ॥२८॥ आयु-र्य्यज्ञेन । कल्प्पताम्प्राणोयज्ञेनकल्प्प-ताञ्चक्षुर्य्यज्ञेनकल्प्पता ँ श्श्रोत्रंय्य ज्ञेनकल्प्पताम्वाग्ग्यज्ञेन कल्प्पताम्म-नौय्यज्ञेन कल्प्पतामात्त्मा यज्ञेन कल्प्पताम्ब्रह्मायज्ञेन कल्प्पताञ्ज्योति-र्य्यज्ञेनकल्प्पता ँ स्वर्य्यज्ञेनकल्प्पता-म्पृष्टंय्यज्ञेन कल्पतां यज्ञोयज्ञेन कल्प्पताम् ॥ स्तोमश्श्चय जुश्श्चऽऋक्च सामच्चबृहच्चरथन्तरञ्च ॥ स्वर्द्देवा-ऽअगन्मामृताऽअभूम प्रजापतेः प्रजा-ऽअभूम वेट् स्वाहा ॥२९॥

इति रुद्रे अष्टमोऽध्यायः ॥८॥

अथ रुद्रशान्त्याध्यायः ॥१॥

हरिः ॐ । ऋचं व्वाचम्प्रपद्ये मनो यजुः प्रपद्ये सामप्प्राणाम्प्रपद्ये चक्षुः श्रोत्रम्प्रपद्ये ॥ व्वागोजः सहोजो मयिप्प्राणापानौ ॥१॥ यन्मेछिद्द्रञ्चक्षुषो हृदयस्य मनसो व्वातितृण्णम्बृहस्प्पतिर्म्मेतद्दधातु ॥ शन्नो भवतुभुवनस्ययस्प्पतिः ॥२॥ भूर्भुवः स्वः तत्सवितुर्व्वरेण्यम्भर्गो देवस्य धीमहि ॥ धियो यो नः प्रचोदयात् ॥३॥ कयानश्चित्रऽआभुवदूती सदावृधः सखा ॥ कया शचिष्ठयाव्वृता ॥४॥ कस्त्वा सत्त्योमदानाम्मंहिष्ठोमत्सदन्धसः ॥ दृढाचिदारुजेव्वसु ॥५॥ अभीषुणः सखीनामविताजरितृणाम् ॥ शतम्भवास्यूतिभिः ॥६॥ कयात्त्वन्नऽऊत्या-

भिप्प्रमन्दसेव्वृषन् ॥ कयास्तोतृभ्य-
ऽआभर ॥७॥ इन्द्रोव्विश्श्वस्य राजति ॥
शन्नोऽअस्तुद्द्विपदेशञ्चतुष्पदे ॥८॥
शन्नोमित्र ꣳ शंव्वरुणꣳशन्नो भवत्वर्य्य
मा ॥ शन्नऽइन्द्रोबृहस्प्पतिꣳ शन्नोव्वि-
ष्णुरुरुक्रम ꣳ ॥९॥ शन्नोव्वातः ।
पवता ꣳ शन्नस्तपतुसूर्य्यः ॥ शन्नꣳ क-
निक्रदद्देवꣳ पर्ज्जन्योऽअभिवर्षतु ॥१०॥
अहानिशम्भवन्तुन ꣳ श ꣳ रात्री
प्प्रतिधीयताम् ॥ शन्नऽइन्द्राग्गनीभव-
तामवोभि ꣳ शन्नऽइन्द्राव्वरुणारातह-
व्या ॥ शन्नऽइन्द्रापूषणाव्वाजं सातौ-
शमिन्द्रासोमासुवितायशंय्योः ॥११॥
शन्नो देवीरभिष्टयऽआपोभवन्तुपीतये ॥
शंय्योरभिस्रवन्तु न ꣳ ॥१२॥
स्योनापृथिवि ।नोभवान्नृक्षरानिवेशनी ॥

यच्छानः शर्म्मसप्रथाः ॥१३॥ आपोहि ष्ठामयोभुवस्तानऽऊर्जेदधातन ॥ महेरणायचक्षसे ॥१४॥ यो वः शिवतमोरसस्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥१५॥ तस्म्माऽअरङ्गमामवो यस्यक्षयाय जिन्वथ ॥ आपोजनयथाचनः ॥१६॥ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवीशान्तिरापꣳ शान्तिरोषधयः शान्तिः ॥ व्वनस्प्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्वꣳशान्तिः शान्तिरेवशान्तिः सामा शान्तिरेधि ॥१७॥ दृतेदृꣳहमामित्रस्य मा चक्षुषा सर्वाणिभूतानिसमीक्षन्ताम् ॥ मित्रस्याहञ्चक्षुषासर्वाणिभूतानिसमीक्षे ॥ मित्रस्य चक्षुषा समीक्षामहे ॥१८॥ दृते दृꣳहमा ॥ ज्योक्त्तेसन्दृशिजीव्यास-

ज्योत्त्क्तेसन्दृशिजीव्व्यासम् ॥१९॥
नमस्तेहरसेशोचिषेनमस्तेऽअस्त्वर्च्चिषे ॥
अन्न्याँस्तेऽअस्म्मत्तपन्तुहेतयः पावको-
ऽअस्म्मब्भ्यᳪ शिवो भव ॥२०॥ नमस्ते-
ऽअस्तुव्विद्युतेनमस्तेस्तनयित्नवे ॥ नम-
स्तेभगवन्नस्तुयतᳫ स्वः समीहसे ॥२१॥
यतो यतᳪ समीहसे ततो नोऽअभय-
ङ्कुरु ॥ शन्नःकुरुप्प्रजाब्भ्योभयन्नᳫ
पशुब्भ्यः ॥२२॥ सुमित्रियानऽआपऽ-
ओषधयᳫ सन्तुदुर्म्मित्रियास्तस्म्मै सन्तु-
योस्म्मान्द्वेष्टियञ्चव्वयन्द्द्विष्म्मᳫ ॥२३॥
तच्चक्षुर्द्देवहितम्पुरस्ताच्छुक्क्रमुच्चरत् ।
पश्येम शरदः शतञ्जीवेम शरदः शतᳪ
शृणुयामशरदःशतम्प्रब्ब्रवामशरदः
शतमदीनाᳫ स्यामशरदः शतम्भू-
यश्चशरदः शतात् ॥२४॥

इति रुद्रे शान्त्याध्यायः ॥९॥

अथ रुद्रे स्वस्तिप्रार्थनामन्त्राऽध्यायः ॥१०॥

हरिः ॐ ॥ स्वस्तिनऽइन्द्रोव्वृद्धश्श्रवाः स्वस्तिनः पूषाव्विश्ववेदाः ॥ स्वस्तिनस्ताक्ष्र्योऽअरिष्टनेमिः स्वस्तिनोबृहस्प्पतिर्द्दधातु ॥१॥ ॐ पयः पृथिव्यामप्पयऽओषधीषुपयोदिव्व्यन्तरिक्षेपयोधाः । पयस्वतीः प्प्रदिशः सन्तुमह्यम् ॥२॥ ॐ व्विष्णोरराटमसिव्विष्णोः श्नप्त्रेस्थो व्विष्णोः स्यूरसिव्विष्णोर्द्ध्रुवोसि ॥ वैष्णवमसिव्विष्णवेत्त्वा ॥३॥ ॐ अग्निर्द्देवताव्वातोदेवता सूर्योदेवता चन्द्रमादेवताव्वसवोदेवता रुद्द्रादेवतादित्यादेवता मरुतोदेवता व्विश्वेदेवादेवताबृहस्प्पतिर्द्देवतेन्द्रोदेवता व्वरुणोदेवता ॥४॥

ॐसद्योजातंप्रपद्यामि सद्योजाताय वैनमोनमः ॥ भवेभवेनातिभवेभवस्व- मांभवोद्भवायनमः ॥५॥ वामदेवाय- नमोज्येष्ठायनमः श्रेष्ठायनमोरुद्रायनम ऽ कालायनम ऽ कलविकरणाय नमो बलविकरणायनमो बलायनमोबल- प्रमथनायनम ऽ सर्वभूतदमनायनमोम- नोन्मनायनमः ॥६॥ अघोरेभ्योथघोरे- भ्योघोरघोरतरेभ्य ऽ ॥ सर्वेभ्य ऽ सर्व- शर्वेभ्यो नमस्तेऽअस्तुरुद्ररूपेभ्यऽ ॥७॥ तत्पुरुषायविद्महे महादेवाय धीमही तन्नोरुद्रः प्रचोदयात् ॥८॥ ईशान- ऽ सर्वविद्यानामीश्वर ऽ सर्वभूतानाम् ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमे- अऽस्तु सदाशिवोम् ॥९॥ ॐ शिवो- नामासिस्वधितिस्ते पितानमस्तेऽअस्तु-

मामाहिᳬसीः । निवर्त्तयाम्म्यायुषेन्ना-
द्यायप्रजननायरायस्पोषायसुप्रजास्त्वाय
सुवीर्य्याय ॥१०॥ ॐ व्विश्वानि-
देवसवितर्दुरितानि परासुव ॥ यद्भ-
द्रन्तन्नऽआसुव ॥११॥ ॐद्यौः शान्ति-
रन्तरिक्षᳬ शान्तिः पृथिवी शान्तिरापः
शान्तिरोषधयः शान्तिः ॥ व्वनस्पतयः
शान्तिर्व्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः
सर्व्वᳬ शान्तिः शान्तिरेवशान्तिः
सामाशान्तिरेधि ॥१२॥ ॐ सर्वेषां वा
एषव्वेदानाᳬ रसोयत्साम सर्वेषामे-
वैनमेतद्वेदानाᳬ रसेनाभिषिञ्चति ॥१३॥

इति स्वस्तिप्रार्थनामन्त्राध्यायः ॥१०॥

ॐ शान्तिःशान्तिःशान्तिः ॥ सुशान्तिर्भवतु ।
सर्वारिष्टशान्तिर्भवतु ॥

अनेन कृतेन रुद्राभिषेककर्मणा श्रीभवानीशङ्करमहारुद्रः
प्रीयतान्नमम ॥

ॐ साम्बसदाशिवार्पणमस्तु ॥ इति ॥

॥ उत्तर न्यासान्विधाय ॥

श्रीशिवमहिम्नः स्तोत्रम्

पुष्पदन्त उवाच

महिम्नः पारन्ते परमविदुषो यद्यसदृशी
स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः ।
अथावाच्यः सर्वः स्वमतिपरिणामावधि गृणन्
ममाप्येष स्तोत्रे हर निरपवादः परिकरः ॥१॥

अतीतः पन्थानं तव च महिमा वाङ्मनसयो-
रतद्व्यावृत्त्यायं चकितमभिधत्ते श्रुतिरपि ।
स कस्य स्तोतव्यः कतिविधगुणः कस्यविषयः
पदे त्वर्वाचीने पतति न मनः कस्य न वचः ॥२॥

मधुस्फीता वाचःपरमममृतं निर्मितवत-
स्तव ब्रह्मन्किं वागपि सुरगुरोर्विस्मयपदम् ।
मम त्वेतां वाणीं गुणकथन पुण्येन भवतः
पुनामीत्यर्थेऽस्मिन् पुरमथन बुद्धिर्व्यवसिता ॥३॥

तवैश्वर्यं यत्तज्जगदुदयरक्षाप्रलयकृत्
त्रयीवस्तुव्यस्तं तिसृषु गुणाभिन्नासुतनुषु ।
अभव्यानामस्मिन् वरद रमणीयामरमणीं
विहन्तुं व्याक्रोशीं विदधत इहैके जडधियः ॥४॥

किमीहः किंकायः स खलु किमुपायस्त्रिभुवनं

किमाधारो धाता सृजति किमुपादान इति च।
अतर्क्यैश्वर्ये त्वय्यनवसरदुःस्थो हतधियः
कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय जगतः ॥५॥
अजन्मानो लोकाः किमवयववन्तोऽपि जगता-
मधिष्ठातारं किं भवविधिरनादृत्य भवति।
अनीशो वा कुर्याद् भुवनजनने कः परिकरो
यतो मन्दास्त्वां प्रत्यमरवर संशेरत इमे ॥६॥
त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च।
रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥७॥
महोक्षः खट्वाङ्गं परशुरजिनं भस्म फणिनः
कपालं चेतीयत्तव वरद तन्त्रोपकरणम्।
सुरास्तां तामृद्धिं विदधति भवद्भ्रूप्रणिहितां
नहि स्वात्मारामं विषयमृगतृष्णा भ्रमयति ॥८॥
ध्रुवं कश्चित्सर्वं सकलमपरस्त्वध्रुवमिदं
परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये।
समस्तेऽप्येतस्मिन्पुरमथन तैर्विस्मित इव
स्तुवञ्जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता ॥९॥

तवैश्वर्यं यत्नाद्यदुपरि विरिञ्चो हरिरधः।
परिच्छेत्तुं यातावनलमनिलस्कन्धवपुषः ॥
ततो भक्तिश्रद्धाभरगुरुगृणद्भ्यां गिरिश यत्
स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति ॥१०॥

अयत्नादापाद्य त्रिभुवनमवैरव्यतिकरं
दशास्यो यद्बाहूनभृत रणकण्डूपरवशान्।
शिरः पद्मश्रेणीरचितचरणाम्भोरुहबलेः
स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जितमिदम् ॥११॥

अमुष्य त्वत्सेवासमधिगतसारं भुजवनं
बलात्कैलासेऽपि त्वदधिवसतो विक्रमयतः।
अलभ्या पातालेऽप्यलसचलिताङ्गुष्ठशिरसि
प्रतिष्ठा त्वय्यासीद् ध्रुवमुपचितो मुह्यति खलः ॥१२॥

यदृद्धिं सुत्राम्णो वरद! परमोच्चैरपि सती-
मधश्चक्रे बाणः परिजनविधेयत्रिभुवनः।
न तच्चित्रं तस्मिन् वरिवसितरि त्वच्चरणयो
र्नकस्या उन्नत्यै भवति शिरसस्त्वय्यवनतिः ॥१३॥

अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपा-
विधेयस्याऽसीद् यस्त्रिनयनविषं संहृतवतः।
स कल्माषः कण्ठे तव न कुरुते न श्रियमहो

विकारोऽपि श्लाघ्यो भुवनभयभङ्गव्यसनिनः ॥१४॥
असिद्धार्था नैव क्वचिदपि सदेवासुरनरे
निवर्तन्ते नित्यं जगति जयिनो यस्य विशिखाः ।
स पश्यन्नीश त्वामितरसुरसाधारणमभूत
स्मरः स्मर्तव्यात्मा न हि वशिषु पथ्यः परिभवः ॥१५॥
मही पादाघाताद् व्रजति सहसा संशयपदं
पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणम् ।
मुहुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताडिततटा
जगद्रक्षायै त्वं नटसि ननु वामैव विभुता ॥१६॥
वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः
प्रवाहो वारां यः पृषतलघुदृष्टः शिरसि ते ।
जगद्द्वीपाकारं जलधिवलयं तेन कृतमि-
त्यनेनैवोन्नेयं धृतमहिम दिव्यं तव वपुः ॥१७॥
रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो
रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति ।
दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडम्बरविधिः
विधेयैः क्रीडन्त्यो न खलु परतन्त्राः प्रभुधियः ॥१८॥
हरिस्ते साहस्रं कमलबलिमाधाय पदयो-
र्यदेकोने तस्मिन्निजमुदहरन्नेत्रकमलम् ।

गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा
त्रयाणां रक्षायै त्रिपुरहर जागर्ति जगताम् ॥१९॥
क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमतां
क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते ।
अतस्त्वां संप्रेक्ष्य क्रतुषु फलदानप्रतिभुवं
श्रुतौ श्रद्धां बद्ध्वा दृढपरिकरः कर्मसु जनः ॥२०॥
क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृता-
मृषीणामार्त्विज्यं शरणद सदस्याः सुरगणाः ।
क्रतुभ्रंशस्त्वत्तः क्रतुफलविधानव्यसनिनो
ध्रुवं कर्तुः श्रद्धाविधुरमभिचाराय हि मखाः ॥२१॥
प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं
गतं रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा ।
धनुष्पाणेर्यातं दिवमपि सपत्राकृतममुं
त्रसन्तंतेऽद्यापि त्यजति न मृगव्याधरभसः ॥२२॥
स्वलावण्याशंसा धृतधनुषमह्नाय तृणवत्
पुरः प्लुष्टं दृष्ट्वा पुरमथन ! पुष्पायुधमपि ।
यदिस्त्रैणं देवी यमनिरतदेहार्धघटन-
दवैति त्वामद्धा बत वरद ! मुग्धा युवतयः ॥२३॥
श्मशानेष्वाक्रीडा स्मरहर ! पिशाचाः सहचरा-

श्चिताभस्मालेपः स्रगपि नृकरोटीपरिकरः ।
अमङ्गल्यं शीलं तव भवतु नामैवमखिलं
तथापि स्मर्तृणां वरद परमं मङ्गलमसि ॥२४

मनः प्रत्यक्चित्ते सविधमवधायात्तमरुतः
प्रहृष्यद्रोमाणः प्रमदसलिलोत्संगितदृशः ।
यदालोक्याह्लादं ह्रद इव निमज्यामृतमये
दधत्यन्तस्तत्वं किमपि यमिनस्तत्किल भवान् ॥२५

त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवह-
स्त्वमापस्त्वं व्योमस्त्वमु धरणिरात्मा त्वमितिच ।
परिच्छिन्नामेवं त्वयि परिणता विभ्रति गिरं
न विद्मस्तत्तत्त्वं वयमिह तु यत्त्वं न भवसि ॥२६।

त्रयीं तिस्रो वृत्तीस्त्रिभुवनमयो त्रीनपि सुरा-
नकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृतिः ।
तुरीयं ते धाम ध्वनिभिरवरुन्धानमणुभिः
समस्तं व्यस्तं त्वां शरणद गृणात्योमितिपदम् ॥२७।

भवः शर्वो रुद्रः पशुपतिरथोग्रः सहमहां-
स्तथा भीमेशानाविति यदभिधानाष्टकमिदम् ।
अमुष्मिन्प्रत्येकं प्रविचरति देवः श्रुतिरपि
प्रियायास्मै धाम्ने प्रणिहितनमस्योऽस्मि भवते ॥२८॥

नमो नेदिष्ठाय प्रियदव दविष्ठाय च नमो
नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः ।
नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमो
नमः सर्वस्मै ते तदिदमितिशर्वाय च नमः ॥२९॥

बहलरजसे विश्वोत्पत्तौ भवाय नमो नमः
प्रबलतमसे तत्संहारे हराय नमो नमः ।
जनसुखकृते सत्त्वोद्रिक्तौ मृडाय नमो नमः
प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः ॥३०॥

कृशपरिणति चेतः क्लेशवश्यं क्व चेदं
क्व च तव गुणसीमोल्लंघिनी शश्वदृद्धिः ।
इति चकितममन्दीकृत्य मां भक्तिराधा-
द्वरद चरणयोस्ते वाक्यपुष्पोपहारम् ॥३१॥

असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रे
सुरतरुवरशाखा लेखनी पत्रमूर्वी ।
लिखति यदि गृहीत्वा शारदा सर्वकालं
तदपि तव गुणानामीश पारं न याति ॥३२॥

असुरसुरमुनीन्द्रैरर्चितस्येन्दुमौले-
र्ग्रथितगुणमहिम्नो निर्गुर्णस्येश्वरस्य ।
सकलगुणवरिष्ठः पुष्पदन्ताभिधानो

रुचिरमलघुवृत्तैः स्तोत्रमेतच्चकार ॥३३॥
अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत्
पठति परमभक्त्या शुद्धचित्तः पुमान् यः ॥
स भवति शिवलोके रुद्रतुल्यस्तथाऽत्र
प्रचुरतरधनायुः पुत्रवान्कीर्तिमांश्च ॥३४॥
दीक्षा दानं तपस्तीर्थं ज्ञानं यागादिकाः क्रियाः ।
महिम्नस्तवपाठस्य कलां नार्हन्ति षोडशीम् ॥३५॥
आसमाप्तमिदं स्तोत्रं पुण्यं गन्धर्वभाषितम् ।
अनूपमं मनोहारि शिवमीश्वरवर्णनम् ॥३६॥
महेशान्नापरो देवो महिम्नो नापरा स्तुतिः ।
अघोरान्नापरो मन्त्रो नास्ति तत्त्वं गुरोः परम् ॥३७॥
कुसुमदशननामा सर्वगन्धर्वराजः
शशिधरवरमौलेर्देवदेवस्य दासः ।
स गुरुनिजमहिम्नो भ्रष्ट एवास्य रोषात्
स्तवनमिदमकार्षीद्दिव्यदिव्यं महिम्नः ॥३८॥
सुरवरमुनिपूज्यं स्वर्गमोक्षैकहेतुं
पठति यदि मनुष्यः प्राञ्जलिर्नान्यचेताः ॥
व्रजति शिवसमीपं किन्नरैः स्तूयमानः
स्तवनमिदममोघं पुष्पदन्तप्रणीतम् ॥३९॥
तव तत्वं न जानामि कीदृशोऽसि महेश्वर । ४०
यादृशोऽसि महादेव तादृशाय नमोनमः ।

एककालं द्विकालं वा त्रिकालं यः पठेन्नरः।
सर्व पाप विनिर्मुक्तः (११५) शिव लोके महीयते ॥ 43॥

श्रीपुष्पदन्तमुखपङ्कजनिर्गतेन
स्तोत्रेण किल्बिषहरेण हरप्रियेण।
कण्ठस्थितेन पठितेन समाहितेन
सुप्रीणितो भवति भूतपतिर्महेशः ॥४०॥

इत्येषा वाङ्मयी पूजा श्रीमच्छङ्करपादयोः।
अर्पिता तेन देवेशः प्रीयतां मे सदाशिवः ॥४१॥

इति श्रीपुष्पदन्तप्रणीत श्री शिवमहिम्नः स्तोत्रं समाप्तम्।

॥ ॐ नमः साम्बसदाशिवाय ॥

पार्वतीलास्यम्

(आचार्य बृहस्पति विरचितम्)

शशाङ्क शेखरज्ज्वलस्मितांशुमालिकालसद्
विनोदमोद सिन्धुमज्जनोत्सुकाऽपराजिता ॥
मदालसाङ्ग—भङ्गिमाऽङ्गनाविलासदेशिका
महेश मोहिनी महेश्वरी जयेदमंगलम् ॥१॥

लसल्ललाटिका विलोल मौक्तिकालि शोभना
लयोर्मिलालिताङ्गहार मालिका मनोहरा ॥
दिगन्नगिन्दिगिन्नन्दिगिन्न गिन्निति ध्वज-
न्मृदङ्ग सङ्गिनी सनोतु पार्वती सदा शिवम् ॥२॥

हिरण्यमयील्लसत् किरीटिनी सुवर्णवर्णिनी

(Left margin, from previous page: ॥३३॥ ॥ ॥३४॥ ३५॥ ३६॥ ३७॥ ८॥ ९॥ ५२)

मणिप्रभामयूखजाल लालिताङ्ग दीपिनी ॥
चलत्कटिस्थ काञ्चिदामिनी द्युति प्रवर्षिणी
सुहासिनीगिरीशनन्दिनी करोतु मङ्गलम् ॥३॥
अनङ्ग सङ्गिनी मनस्तरङ्ग भङ्गि नन्दिता-
ङ्गहार कल्पनाकलाप कौशलान्विता ॥
रुनुञ्झुनुन् रुनुञ्झुनुन् रुनुञ्झुनुन् नादिनी
शिवाविमुक्तताण्डवं शिवञ्चिरायु पश्यतु ॥४॥
सितस्मिताधरप्रवाल निन्दितेन्दु लेखया
विमुक्त बेणिसर्पिणी हृताहि मण्डल श्रिया ॥
शुभाङ्ग भङ्गिनिर्जितौ तरङ्गजाह्नवीत्विषा
प्रमाद्यतामहर्निशं शिवः प्रसन्नयो मया ॥५॥
चलत्पदाम्बुजार्पितै रलक्तकाङ्कितैः परा
म्प्रफुल्लपङ्कजच्छविं समर्प्यदर्पण प्रभम् ॥
हिमावृतावनीत लङ्कटिस्थ किङ्किणी क्वण
प्रवीणया विनोद्यताममन्दमिन्दु शेखरः ॥६॥
महेश मौलि मल्लिका मिलन्मिलिन्द गुञ्जित
म्प्रकल्प्य मध्यमस्वरं सुमध्यमाभि रैशकम् ॥
प्रगीयमानमालिभिः प्रबन्धमङ्गभङ्गिभिः
र्व्यनक्तु शैलजा मनोजवैरिणोऽनिशंमुदे ॥७॥

अपाङ्ग मङ्गिमेङ्गिता भिषङ्गहर्षितो हरः
पदारविन्द नूपुर क्वणेन मन्द हासया ॥
सलीलमालिवृन्दवन्दनोल्लसद्विलासया
निमन्त्र्यतामनङ्गगर्वभञ्जकोऽनुवृत्तये ॥८॥
पुराविशाल बाहुदण्ड मण्डनैभुजङ्गभै
मृदङ्गवेणुवल्लकी निनाद मैहितैस्ततः ॥
श्लथाङ्गबन्धनच्युतैरचञ्चलैश्शनैश्शनैः
सरद्भिरन्तरान्तरा विरम्यतामितस्ततः ॥९॥
मदोल्लसन्महेश मानसोर्मिजालमीलितम्
महानलस्फुलिङ्गवर्जितं ललाट लोचनम्
जटाभुजङ्गराजये शिरः स्वजह्नु सूनवे
निरन्तरं सुखावहं सखी जनाय जायताम् ॥१०॥
उमापद क्रमोल्लसन्मना मानगधीश्वरो
हिलन् स्फुरैश्चलन्मिलन् हसन्ध्वनन्समन्ततः
सखीजनोतवीणितो विनोद भाजनं शिवो
हिमाद्रिजा मृणालबाहुवेष्टितो विलोक्यताम् ॥११॥
हिलत्सुवर्ष कुण्डलोल्लसत्कपोल दर्पणा
लुठद्विलोल मौक्तिका वलील सत्पयोधरा ॥
झनञ्झनञ्झनञ्झनेति कास्य तालक-

स्वनानुवर्तिनी गिरीन्द्रजाश्रयेत्फणीन्द्रिणम् ॥१२॥
॥ शमिति ॥

अथ शिवताण्डवस्तोत्र प्रारम्भः

जटाटवीगलज्जलप्रवाहपावितस्थले
गलेऽवलम्ब्य लम्बितां भुजङ्गतुङ्गमालिकाम् ।
डमड्डमड्डमड्डमन्निनादवड्डमर्वयं
चकार चण्डताण्डवं तनोतु नः शिवः शिवम् ॥१॥

जटाकटाहसंभ्रमभ्रमन्निलिम्पनिर्झरी-
विलोलवीचिवल्लरी विराजमानमूर्द्धनि ।
धगद्धगद्धगज्ज्वलल्ललाटपट्टपावके
किशोरचन्द्रशेखरे रतिः प्रतिक्षणं मम ॥२॥

धराधरेन्द्रनन्दिनीविलासबन्धुबन्धुर-
स्फुरद्दिगन्तसन्ततिप्रमोदमानमानसे ।
कृपाकटाक्षधोरणीनिरुद्धदुर्धरापदि
क्वचिद्दिगम्बरे मनो विनोदमेतु वस्तुनि ॥३॥

जटाभुजङ्गपिङ्गलस्फुरत्फणामणिप्रभा-
कदम्बकुङ्कुमद्रवप्रलिप्तदिग्वधूमुखे ।
मदान्धसिन्धुरासुरत्वगुत्तरीयमेदुरे
मनो विनोदमद्भुतं बिभर्तु भूतभर्तरि ॥४॥

ललाटचत्वरज्वलद्धनञ्जयस्फुलिङ्गभा-
निपीतपञ्चसायकं नमन्निलिम्पनायकम् ।
सुधामयूखरेखया विराजमानशेखरं
महः कपालि संपदे सरिज्जटालमस्तु नः ॥५॥

सहस्रलोचनप्रभृत्यशेषलेखशेखर-
प्रसूनधूलिधोरणीविधूसराङ्घ्रिपीठभूः ।
भुजङ्गराजमालया निबद्ध जाटजूटकः
श्रिये चिराय जायतां चकोरबन्धुशेखरः ॥६॥

करालभालपट्टिकाधगद्धगद्धगज्ज्वल-
द्धनंजयाहुतीकृतप्रचण्डपञ्चसायके ।
धराधरेन्द्रनन्दिनीकुचाग्रचित्रपत्रक-
प्रकल्पनैकशिल्पिनि त्रिलोचने रतिर्मम ॥७॥

नवीनमेघमण्डलीनिरुद्धदुर्धरस्फुरत्
कुहूनिशीथिनीतमः प्रबन्धबद्धकन्धरः ॥
निलिम्पनिर्झरीधरस्तनोतु कृत्तिसुन्दरः
कलानिधानबन्धुरः श्रियं जगद्धुरन्धुरः ॥८॥

प्रफुल्लनीलपङ्कजप्रपञ्चकालिमप्रभा-
बलम्बिकण्ठकन्दलीरुचिप्रबद्धकन्धरम् ।
स्मरच्छिदं पुरच्छिदं भवच्छिदं मखच्छिदं
गजच्छिदान्धकच्छिदं तमन्तकच्छिदं भजे ॥९॥

अखर्वसर्वमङ्गलाकलाकदम्बमञ्जरी-
रसप्रवाहमाधुरीविजृम्भणीमधुव्रतम् ।
स्मरान्तकंपुरान्तकं भवान्तकं मखान्तकं
गजान्तकान्धकान्तकं तमन्तकान्तकं भजे ॥१०॥

जयत्यदभ्रविभ्रमभ्रमद्भुजङ्गमश्वसद्
विनिर्गमक्रमस्फुरत्करालभालहब्यवाट् ।
धिमिंधिमिंधिमिध्वनन्मृदङ्गतुङ्गमङ्गल-
ध्वनिक्रमप्रवर्तितप्रचण्डताण्डवः शिवः ॥११॥

दृषद्विचित्रतल्पयोर्भुजङ्गमौक्तिकस्रजो-
र्गरिष्ठरत्नलोष्ठयोः सुहृद्विपक्ष पक्षयोः
तृणारविन्दचक्षुषोः प्रजामहीमहेन्द्रयोः
समप्रवृत्तिकः कदा सदाशिवं भजाम्यहम् ॥१२॥

कदा निलिम्पनिर्झरीनिकुञ्जकोटरे वसन्
विमुक्तदुर्मतिः सदा शिरस्थमञ्जलिं वहन् ॥
विलोललोललोचनाललामभाललग्नकं
शिवेति मन्त्रमुच्चरन्सदा सुखी भवाम्यहम् ॥१३॥

निलिम्पनाथनागरीकदम्बमौलिमल्लिका-
निगुम्फनिर्भरक्षरन्मधूष्णिकामनोहरः ।
तनोतु नो मनोमुदं विनोदिनीमहर्निशं
परश्रियः परं पदं तदङ्गजत्विषां चयः ॥१४॥

प्रचण्डवाडवानलप्रभाशुभप्रचारिणी
महाष्टसिद्धिकामिनीजनावहूतजल्पना ।
विमुक्तवामलोचनाविवाहकालिकध्वनिः
शिवेति मन्त्रभूषणं जगज्जयाय जायताम् ॥१५॥
इमं हि नित्यमेवमुक्तमुत्तमोत्तमं स्तवं
पठन् स्मरन् ब्रुवन् नरो विशुद्धिमेति सन्ततम् ।
हरे गुरौ सुभक्तिमाशु याति नान्यथा गतिं
विमोहनं हि देहिनां सुशङ्करस्य चिन्तनम् ॥१६॥
पूजावसानसमये दशवक्त्रगीतं
यः शम्भुपूजनमिदं पठति प्रदोषे ॥
तस्य स्थिरां रथगजेन्द्रतुरङ्गयुक्तां
लक्ष्मीं सदैव सुमुखीं प्रददाति शम्भुः ॥१७॥

इति रावणकृत शिवताण्डवस्तोत्रं सम्पूर्णम् ।

कर्पूरार्तिः

इसके बाद कपूर अथवा दीपक (एक या अनेक) द्वारा आरती करें तथा इन मन्त्रों को पढ़ें–

ॐ इद ꣳ हविः प्रजननम्मेअस्तुदश-वीर ꣳ सर्वगण ꣳ स्वस्तये । आत्मसनि-प्रजासनी पशुशनि लोकसन्यभयसनिः ।

अग्नि ऽ प्रजां बहुलाम्मे करोत्वन्नंपयोरे-
तोऽअस्मासु धत्त ॥ ॐ आ रात्रि
पार्थिवꣳ रजः पितुरप्रायि धामभिः ॥
दिव ऽ सदाꣳसि बृहती वितिष्ठस
आत्वेषं वर्तते तमः ॥

जयगंगाधर आरती

जयगंगाधर हर शिव जय गिरजाधीशा ॥ शिव जय० ॥
त्वं मां पालय नित्यं कृपया जगदीशा ॥ ॐ हर हर हर महादेव ॥१॥
कैलासे गिरि शिखरे कल्पद्रुम विपिने ॥ शिव० ॥
गुंजति मधुकर पुंजे कुंज वने गहने ॥ ॐ हर० ॥२॥
कोकिल कूजति खेलति हंसावलि ललितां ॥ शिव० ॥
रचयति कला कलापं नृत्यति मुद सहिता ॥ ॐ हर० ॥३॥
तस्मिल्ललित मुदेशे शालामणि रचिता ॥ शिव० ॥
तन्मध्ये हर निकटे गौरी मुद सहिता ॥ ॐ हर० ॥४॥
क्रीडां रचयति भूषां रंजित निजमीशं ॥ शिव० ॥
ब्रह्मादिक सुरसेवित प्रणमति ते शीर्षं ॥ ॐ हर० ॥५॥
विबुधवधूबहुनृत्यति हृदये मुद सहिता ॥ शिव० ॥
किन्नरगानं कुरुते सप्तस्वर सहिता ॥ ॐ हर० ॥६॥
धिनकत थै थै धिनकत मृदंगं वादयते ॥ शिव० ॥
क्वण क्वण ललिता वेणुं मधुरं नादयते ॥ ॐ हर० ॥७॥

रुण रुण चरणे रचयति नुपरमुज्वलिता ॥ शिव० ॥
चक्रावर्ते भ्रमयति कुरुते तां धिक तां ॥ ॐ हर० ॥८॥
तां तां लुप चुप तालं मधुरं नादयते ॥ शिव० ॥
अंगुष्ठांगुलि नादं लास्यकतां कुरुते ॥ ॐ हर० ॥९॥
कर्पूरद्युति गौरं पंचानन सहितम् ॥ शिव० ॥
त्रिनयन शशधर मौले विषधर कण्ठयुतम् ॥ ॐ हर० ॥१०॥
सुन्दर जटाकलापं पावक युत भालं ॥ शिव० ॥
डमरु त्रिशूलपिनाकं कर धृत नृकपालम् ॥ ॐ हर० ॥११॥
शंख निनादं कृत्वा झल्लरि नादयते ॥ शिव० ॥
नीराजयते ब्रह्मा वेद ऋचां पठते ॥ ॐ हर० ॥१२॥
इति मृदुचरण सरोजे हृति कमले धृत्वा ॥ शिव० ॥
अवलोकयति महेशं ईशं अभिनत्वा ॥ ॐ हर० ॥१३॥
मुण्डरचित उर माला पन्नग उपवीतम् ॥ शिव० ॥
वाम विभागे गिरजा रूपं अति ललितम् ॥ ॐ हर० ॥१४॥
सकल शरीरे मनसिज कृत भस्माभरणम् ॥ शिव० ॥
इति वृषभध्वजरूपे तापत्रय हरणम् ॥ ॐ हर० ॥१५॥
ध्यानं आरति समये हृदये इति कृत्वा ॥ शिव० ॥
रामं त्रिजटानाथं ईशं अभिनत्वा ॥ ॐ हर० ॥१६॥
आरतिमेवं प्रतिदिन पठनं यः कुरुते ॥ शिव० ॥
शिव सायुज्यं गच्छति भक्त्या या शृणुते ॥ ॐ हर० ॥१७॥

॥ नमः शिवाय ॥

आरती

ॐ जय शिव ओंकारा हर जय शिव ओंकारा ॥
ब्रह्मा विष्णु सदाशिव अर्द्धंगी धारा ॥ ॐ हर हर हर महादेव ॥

एकानन चतुरानन पंचानन राजै ॥ शिव पंचानन० ॥
हंसासन गरुड़ासन वृषवाहन राजै ॥ ॐ हर हर हर महादेव ॥
दोयभुज चार चतुर्भुज दशभुज ते सोहै ॥ शिव दश० ॥
तीनों रूप निरखता त्रिभुवन जन मोहै ॥ ॐ हर हर हर महादेव ॥
अक्षमाला वनमाला मुण्डमाला धारी ॥ शिव मुण्ड० ॥
चन्दन मृगमद चन्दा भाले शुभकारी ॥ ॐ हर हर हर महादेव ॥
नन्दीवाहन खग वाहन शिव चक्रत्रिशूलधारी ॥ शिव चक्र० ॥
त्रिपुरारी शुभकारी कर कमलाधारी ॥ ॐ हर हर हर महादेव ॥
श्वेताम्बर पीताम्बर बाघाम्बर अंगे ॥ शिव बाघा० ॥
ब्रह्मादिक सनकादिक भूतादिक संगे ॥ ॐ हर हर हर महादेव ॥
लक्ष्मीवर सावित्री गंगा पारवती संगे ॥ शिव पार० ॥
बाघाम्बर आसन पर उमया अर्धंगे ॥ ॐ हर हर हर महादेव ॥
करमध्ये सुकमण्डलु चक्र त्रिशूल धर्ता ॥ शिव चक्र० ॥
जगकर्ता जगभर्ता जन-पालन करता ॥ ॐ हर हर हर महादेव ॥
ब्रह्मा विष्णु सदाशिव जानत अविवेका ॥ शिव जानत० ॥
प्रणवाक्षर अनु मध्ये ये तीनों एका ॥ ॐ हर हर हर महादेव ॥
काशी में विश्वनाथ विराजै नन्दी ब्रह्मचारी ॥ शिव नन्दी० ॥
नित उठि दरसन पावत महिमा अति भारी ॥ ॐ हर हर हर महादेव ॥
साम्ब सदाशिव की आरति जो कोई नर गावै ॥ शिव जो० ॥
कहत शिवानन्द स्वामी इच्छा फल पावै ॥ ॐ हर हर हर महादेव ॥

कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारं ।
सदावसन्तं हृदयारविन्दे भवं भवानी सहितं नमामी ॥

कदलीगर्भ संभूतं कर्पूरेण प्रदीपितम् ।
आरार्तिक्यमहं कुर्वे पश्य मे वरदो भव ॥

इसके बाद आरती जल द्वारा शीतल करें । सभी भक्तजन आरती लें । हाथ धोकर भगवान को प्रणाम करें । हाथ में पुष्प-बिल्वपत्र आदि लेकर पुष्पांजलि करें ।

पुष्पाञ्जलि

ॐ यज्ञेन यज्ञमयजयन्त देवास्तानि धर्म्माणिप्रथमान्यासन् तेहनाकम्महि-मानः सचन्तयत्रपूर्वेसाध्याः सन्तिदेवाः ॥१॥

ॐ विश्वतश्चक्षुरुतविश्वतो मुखो विश्वतो बाहुरुत व्विश्वतस्पात् ॥ सम्बाहुब्भ्यान्धमति सम्पतत्रैर्द्यावा भूमी जनयन्देवऽएकः ॥२॥

ॐ तत्पुरुषायविद्महेमहादेवाय धीमहि ॥ तन्नोरुद्रः प्रचो दयात् ॥३॥

ॐ राजाधिराजाय प्रसह्य साहिने नमो वयं वैश्रवणाय कुर्महे । समे

कामान्कामकामाय मह्यम् । कामेश्वरो वैश्रवणो ददातु । कुबेराय वैश्रवणाय । महाराजायनमः ।

ॐ स्वस्ति साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराजमाधिपत्यमयं समन्त पर्यायी स्यात् । सार्वभैमः सार्वायुष आन्तादापरार्धात् । पृथिव्यै समुद्रपर्यंताया एकराडितितदप्येष श्लोकोऽभिगीतो मरुतः परिवेष्टारो मरुतस्यावसन्गृहे । आवीक्षितस्य कामप्रेर्विश्वेदेवाः सभासद इति ॥

ॐ मानस्तोके तनये मानऽआयुषि मानो गोषुमानो अश्वेषुरीरिषः । मानो व्वीरान्रुद्रभामिनो व्वधीर्हविष्मन्तः सदमित्वा हवामहे ॥

सेवन्तिकाबकुलचम्पकपाटलाब्जैः पुन्नागजातिकर वीररसाल पुष्पैः । विल्व प्रवाल तुलसीदल मंजरीभिः त्वां पूजयामि विश्वेश्वर मे प्रसीद ॥

मंत्र पुष्पाञ्जलिं समर्पयामि

इसके बाद अपने स्थान पर खड़े होकर एक प्रदक्षिणा करें ।

ॐ ये तीर्थानि प्रचरन्ति सृकाहस्ता

निषङ्गिणः । तेषा ँ सहस्त्रयोजनेऽवधन्वा नितन्मसि ॥

ॐ सप्तास्यासन्परिधयस्त्रिः सप्तसमिधः कृताः ॥ देवायद्यज्ञन्तन्वानाऽअवध्नन्पुरुषम्पशुम् ॥

इसके बाद आसन पर बैठकर शिवादि सभी देवताओं का उत्तर पूजन करें ।

ॐ नमः शंभवाय च मयोभवाय च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥

गन्धाक्षतपुष्पधूपदीपनैवेद्यं निवेदयामि

इसके बाद सब शान्त होकर भगवान शंकर के स्तोत्र का श्रद्धा से पाठ करें ।

श्री रुद्राष्टकम्

नमामी शमीशान निर्वाणरूपं । विभुं व्यापकं ब्रह्मवेद स्वरूपं ॥
निजं निर्गुणं निर्विकल्पं निरीहं । चिदाकाशमाकाशवासं भजेऽहं ॥१॥
निराकारमोंकारमूलं तुरीयं । गिराज्ञान गोतीतमीशं गिरीशं ॥
करालं महाकालकालं कृपालं । गुणागार संसारसारं नतोऽहं ॥२॥
तुषाराद्रि संकाशगौरं गभीरं । मनोभूत कोटि प्रभाश्री शरीरं ॥

स्फुरन्मौलि कल्लोलिनी चारुगंगा। लसद्भाल बालेन्दु कंठे भुजंगा ॥३॥
चलत्कुण्डलं भ्रू सुनेत्रं विशालं। प्रसन्नाननं नीलकण्ठं दयालं॥
मृगाधीश चर्माम्बरं मुण्डमालं। प्रियं शंकरं सर्वनाथं भजामि ॥४॥
प्रचण्डं प्रकृष्टं प्रगल्भं परेशं। अखण्डं अजं भानुकोटि प्रकाशं॥
त्रयः शूल निर्मूलनं शूलपाणि। भजेऽहं भवानीपतिं भावगम्यं ॥५॥
कलातीत कल्याण कल्पान्तकारी। सदासज्जनानन्द दाता पुरारी॥
चिदानन्द संदोह मोहापहारी। प्रसीद प्रसीद प्रभो मन्मथारी ॥६॥
न यावद् उमानाथ पादारविन्दं। भजंतीह लोके परे वा नराणाम्॥
न तावत्सुखं शान्ति संतापनाशं। प्रसीद प्रभो सर्वभूताधिवासं ॥७॥
न जानामि योगं जपं नैवपूजां। नतोऽहं सदा सर्वदा शंभु तुभ्यं॥
जराजन्मदुःखौघ तातप्यमानं। प्रभोपाहि आपन्नमामीश शंभो ॥८॥

रुद्राष्टकमिदं प्रोक्तं विप्रेण हरतुष्टये॥
ये पठन्ति नरा भक्त्या तेषां शंभुः प्रसीदति ॥९॥

ॐ नमः शिवाय

इसके बाद तिलक आशीर्वाद आदि करें ।। ब्राह्मणों को दक्षिणा दें। इसके बाद विसर्जन तथा अभिषेक करें।

॥ सदा शिवार्पणमस्तु ॥

शिवाऽष्टोत्तरशतनामस्तोत्रम् (१)

देवा ऊचुः

जय शम्भो विभो रुद्र स्वयम्भो जय शङ्कर ! ।
जयेश्वर जयेशान जय सर्वज्ञ कामद ! ॥१॥

नीलकण्ठ जय श्रीद श्रीकण्ठ जय धूर्जटे ! ।
अष्टमूर्तेऽनन्तमूर्ते महामूर्ते जयानघ ! ॥ २ ॥

जय पापहरानङ्ग - निःसङ्गाभङ्ग - नाशन ! ।
जय त्वं त्रिदशाधार त्रिलोकेश त्रिलोचन ! ॥ ३ ॥

जय त्वं त्रिपथाधार त्रिमार्ग त्रिभिरूर्जित ! ।
त्रिपुरारे त्रिधामूर्ते जयैक-त्रिजटात्मक ! ॥ ४ ॥

शशिशेखर शूलेश पशुपाल शिवाप्रिय ! ।
शिवात्मक शिव श्रीद सुहृच्छीशतनो जय ! ॥ ५ ॥

सर्व सर्वेश भूतेश गिरिश त्वं गिरीश्वर ! ।
जयोग्ररूप भीमेश भव भर्ग जय प्रभो ! ॥ ६ ॥

जय दक्षाऽध्वर - ध्वंसिन्नन्धक - ध्वंसकारक ! ।
रुण्डमालिन् कपालिंस्त्वं भुजङ्गनिजभूषण ! ॥ ७ ॥

दिगम्बर दिशांनाथ व्योमकेश चितांपते ! ।
जयाधार निराधार भस्माधार धराधर ! ॥ ८ ॥

देवदेव महादेव देवतेशादिदैवत ।
बह्निवीर्य जय स्थाणो जयायोनिजसम्भव ॥ ९ ॥

भव शर्व महाकाल भस्माङ्ग सर्पभूषण ।
त्र्यम्बकस्थपते वाचांपते भो जगतांपते ॥१०॥

शिपिविष्ट विरूपाक्ष जय लिङ्ग वृषध्वज ।

नीललोहित पिङ्गाक्ष जय खट्वाङ्गमण्डन ॥११॥
कृत्तिवास अहिर्बुध्न्य मृडानीश जटाम्बुभृत् ।
जगद्भ्रातर्जगन्मातर्जगत्तात जगद्गुरो ॥१२॥
पञ्चवक्त्र महावक्त्र कालवक्त्र गजास्यभृत् ।
दशबाहो महाबाहो महावीर्य महाबल ॥१३॥
अघोरघोरवक्त्र त्वं सद्योजात उमापते ।
सदानन्द महानन्द नन्दमूर्ते जयेश्वर ॥१४॥
एवमष्टोत्तरशतं नाम्नां देवकृतं तु ये ।
शम्भोर्भक्त्या स्मरन्तीह शृण्वन्ति च पठन्ति च ॥१५॥
न तापास्त्रिविधास्तेषां न शोको न रुजादयः ।
ग्रहगोचरपीडा च तेषां क्वाऽपि न विद्यते ॥१६॥
श्रीःप्रज्ञा-ऽऽरोग्यमायुष्यं सौभाग्यं भाग्यमुन्नतिम् ।
विद्यां धर्मं मतिः शम्भोर्भक्तिस्तेषां न संशयः ॥१७॥

इति श्रीस्कन्दपुराणे शिवाष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ॥

हिमालयकृतं शिवस्तोत्रम् (२)

हिमालय उवाच

त्वं ब्रह्मा सृष्टिकर्ता च त्वं विष्णुः परिपालकः ।
त्वं शिवः शिवदोऽनन्तः सर्वसंहारकारकः ॥१॥
त्वमीश्वरो गुणातीतो ज्योतीरूपः सनातनः ।
प्रकृतिः प्रकृतीशश्च प्राकृतः प्रकृतेः परः ॥२॥
नानारूपविधाता त्वं भक्तानां ध्यानहेतवे ।
येषु रूपेषु यत्प्रीतिस्तत्तद्रूपं बिभर्षि च ॥३॥

सूर्यस्त्वं सृष्टिजनक आधारः सर्वतेजसाम् ।
सोमस्त्वं सस्यपाता च सततं शीतरश्मिना ॥४॥

वायुस्त्वं वरुणस्त्वं च विद्वांश्च विदुषां गुरुः ।
मृत्युञ्जयो मृत्युमृत्युः कालकालो यमान्तकः ॥५॥

वेदस्त्वं वेदकर्ता च वेदवेदाङ्गपारगः ।
विदुषां जनकस्त्वं च विद्वांश्च विदुषां गुरुः ॥६॥

मन्त्रस्त्वं हि जपस्त्वं हि तपस्त्वं सत्फलप्रदः ।
वाक् त्वं रागाधिदेवी त्वं तत्कर्ता तद्गुरूः स्वयम् ॥७॥

अहो सरस्वतीबीजं कस्त्वां स्तोतुमिहेश्वरः ।
इत्येवमुक्त्वा शैलेन्द्रस्तस्थौ घृत्वा पदाम्बुजम् ॥८॥

तत्रोवास तमाबोध्य चावरुह्य वृषाच्छिवः ।
स्तोत्रमेतन्महापुण्यं त्रिसन्ध्यं यः पठेन्नरः ॥९॥

मुच्यते सर्वपापेभ्यो भयेभ्यश्च भवार्णवे ।
अपुत्रो लभते पुत्रं मासमेकं पठेद्यदि ॥१०॥

भार्याहीनो लभेद् भार्यां सुशीलां सुमनोहराम् ।
चिरकालगतं वस्तु लभते सहसा ध्रुवम् ॥११॥

राज्यभ्रष्टो लभेद्राज्यं शङ्करस्य प्रसादतः ।
कारागारे श्मशाने च शत्रुग्रस्तेऽतिसङ्कटे ॥१२॥

गम्भीरेऽतिजलाकीर्णे भग्नपोते विषादने ।
रणमध्ये महाभीते हिंस्त्रजन्तुसमन्विते ।
सर्वतो मुच्यते स्तुत्वा शङ्करस्य प्रसादतः ॥१३॥

इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे हिमालयकृतं शिवस्तोत्रं सम्पूर्णम् ।

अथ अष्टोत्तरशत शिवनामावलि

१ शिवाय नमः ।
२ महेश्वराय नमः ।
३ शंभवे नमः ।
४ पिनाकिने नमः ।
५ शशिशेखराय नमः ।
६ वामदेवाय नमः ।
७ विरूपाक्षाय नमः ।
८ कपर्द्दिने नमः ।
९ नीललोहिताय नमः ।
१० शंकराय नमः ।
११ शूलपाणये नमः ।
१२ खट्वाङ्गधारिणे नमः ।
१३ विष्णुवल्लभाय नमः ।
१४ शिपिविष्टाय नमः ।
१५ अम्बिकानाथाय नमः ।
१६ श्रीकंठाय नमः ।
१७ भक्तवत्सलाय नमः ।
१८ भवाय नमः ।
१९ शर्वाय नमः ।
२० त्रिलोकेशाय नमः ।
२१ शितिकण्ठाय नमः ।
२२ शिवाप्रियाय नमः ।
२३ उग्राय नमः ।
२४ कपालिने नमः ।
२५ कामारये नमः ।
२६ अंधकासुरसूदनाय नमः ।
२७ गंगाधराय नमः ।
२८ ललाटाक्षाय नमः ।
२९ कालकालाय नमः ।
३० कृपानिधये नमः ।
३१ भीमाय नमः ।
३२ परशुहस्ताय नमः ।
३३ मृगपाणये नमः ।
३४ जटाधराय नमः ।
३५ कैलाशवासिने नमः ।
३६ कवचये नमः ।
३७ कठोराय नमः ।
३८ त्रिपुरान्तकाय नमः ।
३९ वृषाङ्काय नमः ।
४० वृषभारूढाय नमः ।
४१ भस्मोद्धूलित विग्रहाय नमः
४२ सामप्रियाय नमः ।
४३ स्वरमयाय नमः ।
४४ त्रयीमूर्तये नमः ।
४५ अनीश्वराय नमः ।
४६ सर्वज्ञाय नमः ।
४७ परमात्मने नमः ।
४८ सोमसूर्याग्निलोचनाय नमः
४९ हविर्यज्ञमयाय नमः ।
५० सोमाय नमः ।

५१ पंचवक्त्राय नमः ।
५२ सदाशिवाय नमः ।
५३ विश्वेश्वराय नमः ।
५४ वीरभद्राय नमः ।
५५ गणनाथाय नमः ।
५६ प्रजापतये नमः ।
५७ हिरण्यरेतसे नमः ।
५८ दुर्द्धर्षाय नमः ।
५९ गिरीशाय नमः ।
६० गिरिशाय नमः ।
६१ अनघाय नमः ।
६२ भुजंगभूषणाय नमः ।
६३ भर्गाय नमः ।
६४ गिरिधन्वने नमः ।
६५ गिरिप्रियाय नमः ।
६६ कृत्तिवासाय नमः ।
६७ पुरारये नमः ।
६८ भगवते नमः ।
६९ प्रमथाधिपाय नमः ।
७० मृत्युंजयाय नमः ।
७१ सूक्ष्मतनवे नमः ।
७२ जगद्व्यापिने नमः ।
७३ जगद्गुरुवे नमः ।
७४ व्योमकेशाय नमः ।
७५ महासेनाय नमः ।
७६ जनकाय नमः ।
७७ चारुविक्रमाय नमः ।
७८ रुद्राय नमः ।
७९ भूतपतये नमः ।
८० स्थाणवे नमः ।
८१ अहिर्बुध्नाय नमः ।
८२ दिगम्बराय नमः ।
८३ अष्टमूर्तये नमः ।
८४ अनेकात्मने नमः ।
८५ सात्त्विकाय नमः ।
८६ शुद्धविग्रहाय नमः ।
८७ शाश्वताय नमः ।
८८ खण्डाय नमः ।
८९ परशुरजसे नमः ।
९० पाशविमोचकाय नमः ।
९१ मृडाय नमः ।
९२ पशुपतये नमः ।
९३ अव्ययाय नमः ।
९४ महादेवाय नमः ।
९५ देवाय नमः ।
९६ प्रभवे नमः ।
९७ पूषदन्तविदारिणे नमः ।
९८ व्यग्राय नमः ।
९९ दशाध्वरहरये नमः ।
१०० हराय नमः ।
१०१ भगनेत्रभिदे नमः ।
१०२ अव्यक्ताय नमः ।

१०३ सहस्राक्षाय नमः । १०६ अनन्ताय नमः ।
१०४ सहस्रपातये नमः । १०७ तारकाय नमः ।
१०५ अपवर्गप्रदाय नमः । १०८ परमेश्वराय नमः ।

इसके उपरान्त बैठकर हाथ जोड़ कर शिवजी की स्तुति करें—

त्रिनेत्राय नमस्तुभ्यं उमादेहार्धधारिणे ।
त्रिशूलधारिणे तुभ्यं भूतानां पतये नमः ॥
गंगाधर नमस्तुभ्यं वृषभध्वज नमोस्तुते ।
आशुतोष नमस्तुभ्यं भूयो भूयो नमो नमः ॥
आवाहनं न जानामि न जनामि विसर्जनम् ।
पूजां चैव न जानामि क्षमस्व परमेश्वर ॥

इसके बाद देवताओं का उत्तर पूजन करें तथा प्रणाम करें—

सौराष्ट्रे सोमनाथं च श्रीशैलेमल्लिकार्जुनम् ।
उज्जयिन्यां महाकाल ओंकारममरेश्वरम् ॥
केदार हिमवत्पृष्ठे डाकिन्यां भीमशंकरम् ।
वाराणस्यां च विश्वेशं त्र्यम्बकं गौतमीतटे ॥
वैद्यनाथ चिताभूमौ नागेशं दारुकावने ।
सेतुबन्धे च रामेशं घुष्मेशं च शिवालये ॥
द्वादशैतानि नामानि पूजाकाले सदा पठेत् ॥

करचरणकृतं वा क्कायजं कर्मजं वा
श्रवणनयनजं वा मानसं वाऽपराधम् ॥
विहितमविहितं वा: सर्वमेतत्क्षमस्व
जय जय करुणाब्धे श्रीमहादेव शंभो ॥
नमः पार्वतीपतये हर ।

काल हर, कंटक हर, दुःख हर, दारिद्र्य हर।
हर हर कहे तो हारे क्यों, हर का नाम विसारे क्यों।

अनेन श्रीरुद्रपूजाभिषेककर्मणा भगवद्भवानीशंकर देवता प्रीयतां न मम ।। ॐ शिवार्पणमस्तु ।।

ॐ नमः शिवाय ।। ॐ नमः शिवाय ।। ॐ नमः शिवाय ।।

अथ पौराणिक रुद्राभिषेक

वेदों एवं पुराणों में शिर्वाचन की अनेक विधियाँ वर्णन की गयी हैं। वेद के मंत्रों से अभिषेक करना सर्वसाधारण के वश की बात नहीं है। अतएव यहाँ श्री महाभारत के द्रोण–पर्व में वर्णित पौराणिक रुद्राभिषेक दे रहे हैं। भगवान् श्रीकृष्ण ने अर्जुन को इस विधि का उपदेश किया था। इसके अनेक प्रकार हैं। संतान की इच्छा वाला तन्डुल से, धन प्राप्ति के लिये बिल्वपत्र से, कन्या के लिये धान्य से (समूचे धान), दीर्घायु के लिये दूर्वाङ्कुर से, पशु–वाहन–भृत्य आदि की इच्छा के लिये गोघृत की धारा से, शत्रु नाश के लिये कुशोदक से श्री आशुतोष भगवान् शिव पर यह श्लोक बोलकर कम से कम ११ बार अभिषेक करना चाहिये। यह अभिषेक विधि भी सद्यःफलदायी है।

अभिषेक श्लोकाः

ॐ नमो भवाय शर्वाय रुद्राय वरदाय च ।
पशूनांपतये नित्यं उग्राय च कपर्दिने ॥१॥
महादेवाय भीमाय त्र्यम्बकाय शिवाय च ।
ईशानाय मखघ्नाय नमस्ते मखघातिने ॥२॥
कुमारगुर्वे नित्यं नीलग्रीवाय वेधसे ।
विलोहिताय धूम्राय व्याधिने चापराजिते ॥३॥

नित्यं नील शिखंडाय शूलिने दिव्यचक्षुषे ।
हन्त्रे गोत्रे त्रिनेत्राय व्याधाय च सुरेतसे ॥४॥
अचिन्त्यायाम्बिकामंत्र सर्वदेवस्तुताय च ।
वृषभध्वजाय मुण्डाय जटिने ब्रह्मचारिणे ॥५॥
विश्वात्मके विश्वसृजे विश्वमावृत्त तिष्ठते ।
नमो नमस्ते सत्याय भूतानां प्रभवे नमः ॥६॥
पंचवक्त्राय शर्वाय शंकराय शिवाय च ।
नमोऽस्तु वाचस्पतये प्रजानांपतये नमः ॥७॥
विश्वस्यपतये नित्यं महतांपतये नमः ।
नमः सहस्त्रशीर्षाय सहस्त्रभुजमन्यवे ॥८॥
सहस्त्रनेत्रपादाय नमः सांख्याय कर्मणे ॥९॥
नमो हिरण्यवर्णाय हिरण्यकवचाय च ।
भक्तानुकंपिने नित्यं सिद्ध्यतां नो वर प्रभो ॥१०॥
एवं स्तुस्त्वा महादेवं वासुदेवसहार्जुनः ।
प्रसादयामासभवं तदा शस्त्रोपलब्धये ॥११॥

॥ ॐ नमः पार्वतीपतये हर हर हर महादेव ॐ ॥

परिशिष्ट-प्रथमः (१)

अथ पार्थिव पूजनविधिः

जिस समय ब्रह्मा और विष्णु का विवाद हुआ था उस समय उनका गर्व दूर करने के लिये भगवान शंकर लिङ्गरूप में प्रकट हुए थे तथा उनका गर्व दूर किया था। उस समय उन्होंने उन दोनों

एवं सम्पूर्ण विश्व को अपने अनन्तस्वरूप के दर्शन कराये थे। वहीं से लिङ्गार्चन आरंभ हुआ। लिङ्गों के अनेक प्रकार हैं। शिवपुराण एवं स्कन्दपुराणों में विविध प्रकार के शिवलिङ्गों का वर्णन तथा पूजन का फल भी लिखा है। यथा—रत्नलिङ्ग, धातुलिङ्ग, स्वयंभूलिङ्ग, बाणलिङ्ग, ज्योतिर्लिङ्ग, रसलिङ्ग, नर्मदेश्वरलिङ्ग, पार्थिवेश्वर लिङ्ग, आदि अनेक प्रकार के लिङ्गों का वर्णन मिलता है। यहाँ यही सोचकर शान्ति हो जाती है कि—

शिवतत्त्वं न जानामि कीदृशोऽसि महेश्वर॥
यादृशोऽसि महादेव तादृशाय नमोस्तु ते॥

अतएव यहाँ हम पार्थिवेश्वरलिङ्ग की सामान्य पूजन विधि का वर्णन करते हैं। यों तो पार्थिव नाम पृथ्वी से उत्पन्न होने का है। अतः सभी पाषाणलिङ्ग पार्थिवेश्वर होते हैं, किन्तु प्रायः मिट्टी एवं बालू आदि से निर्मित लिङ्ग को ही पार्थिवेश्वरलिङ्ग कहते हैं।

पार्थिवेश्वरलिङ्ग पूजन क्रम

आरंभ में पहले लिखी विधि के अनुसार आचमन, प्राणायाम, भूशुद्धि, जलशुद्धि, स्वस्तिवाचन, संकल्प आदिक सारे कृत्य करें।

हरो महेश्वरश्चैव शूलपाणिः पिनाकधृक्॥
शिवःपशुपतिश्चैव महादेव विसर्जनम्॥

"ॐ ह्रां पृथिव्यै नमः" मंत्र से पृथ्वी की प्रार्थना करें।

"ॐ हराय नमः" कहकर मृत्तिका ग्रहण करें।

"ॐ बं" कहकर मिट्टी गूँथें।

"ॐ शूलपाणये नमः" से प्रतिमा की स्थापना करें।

इसके बाद हाथ में जल लेकर विनियोग छोड़ें—

ॐ अस्य श्रीशिवपंचाक्षरमन्त्रस्य वामदेवऋषिः अनुष्टुप्छन्दः श्रीसदाशिवो देवता ॐ बीजं। नमः शक्तिः। शिवाय कीलकं। ममसाम्बसदाशिवप्रीतये पूजने—जपे च विनियोगः॥

ॐ वामदेवाय ऋषये नमः शिरसि । ॐ अनुष्टुप्छन्दसे नमः मुखे । ॐ सदाशिवदेवतायै नमः हृदि । ॐ बीजाय नमः गुह्ये । ॐ शक्तये नमः पादयोः । ॐ शिवायकीलकाय नमः सर्वाङ्गे । ॐ शिं सद्योजाताय नमः गुह्ये । ॐ वां वामदेवाय नमो मूर्ध्नि । ॐ यं ईशानाय नमो मुखे । ॐ अं अंगुष्ठाभ्याम् नमः । ॐ नं तर्जनीभ्याम् स्वाहा । ॐ मं मध्यमाभ्याम् वषट् । ॐ शिं अनामिकाभ्याम् हुं । ॐ वां कनिष्ठिकाभ्याम् वौषट् । ॐ यं करतलकरपृष्ठाभ्याम् फट् । ॐ हृदयाय नमः । ॐ नं शिरसे स्वाहा । ॐ मं शिखायै वषट् । ॐ शिं कवचाय हुँ । ॐ वां नेत्रत्रयाय वौषट् । ॐ यं अस्त्राय फट् ।

इस प्रकार अंगन्यास करने के बाद प्राण प्रतिष्ठा करे ।

विनियोग—

ॐ अस्य श्री प्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुमहेश्वराः ऋषयः ऋग्यजुः सामानिच्छन्दांसि क्रियामय वपुः—प्राणाख्या देवता आँ वीजम्, ह्रीं शक्तिः, क्रौं कीलकम्, देवप्राणप्रतिष्ठापने विनियोगः ।

ॐ ब्रह्मविष्णुरुद्रऋषिभ्यो नमः शिरसि । ऋग्यजुःसामच्छन्दसेभ्यो नमो मुखे । प्राणाख्या देवतायै नमः हृदि । आँ बीजाय नमो गुह्ये । क्लीं शक्तये नमः पादयोः । क्रौं कीलकाय नमः सर्वांगे ।

ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं सः सोऽहं शिवस्य प्राणाः इह प्राणाः ।। ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं सः सोऽहं शिवस्य जीव इह स्थितः ।। ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं सः सोऽहं शिवस्य सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षु-श्रोत्र—घ्राण—जिह्वा-पाणि—पाद—पायूपस्थानि इहागत्य सुखं-चिरं—तिष्ठन्तु स्वाहा ।।

इसके बाद हाथ में ही पार्थिवलिङ्ग लिए हुए शिवजी का आवाहन करें —

ॐ भूः पुरुषं साम्बसदाशिवमावाहयामि।
ॐ भुवः पुरुषं साम्बसदाशिवमावाहयामि।
ॐ स्वः पुरुषं साम्बसदाशिवमावाहयामि।

स्वामिन् सर्वजगन्नाथ यावत् पूजावसानकम्॥
तावत्वं प्रीतिभावेन लिङ्गेऽस्मिन् सन्निधिं कुरु॥

इसके बाद पहले लिखी विधि से पूजन–पाठ–अभिषेक–आरती–पुष्पाञ्जलि करे फिर चावल छोड़ कर विसर्जन करे—

इसके बाद अभिषेक का जल लेकर आचमन एवं मार्जन करे।

ॐ देवस्यंत्वासवितुः प्प्रसवेश्श्विनो र्ब्बाहुब्भ्यां पूष्णो हस्ताब्भ्याम्। सरस्वत्यैव्वाचोयन्तुर्य्यन्त्रियै दधामि बृहस्प्पतेष्ट्वासाम्म्राज्ज्येनाभिषिंचाम्यसो॥

ॐ आपोहिष्ठा.............आदि मंत्रों से भी अभिषेक करे।

॥ इति पार्थिवेश्वरार्चनविधिः॥ ॥ शुभम्॥

॥ ॐ सदाशिवार्पणमस्तु ॐ॥

परिशिष्ट द्वितीय (२)

ॐ नमः शिवाय

महामृत्युञ्जय-जपविधिः

श्रीमहामृत्युञ्जयजप बड़ा कठिन एवं तत्काल चमत्कारिक फलदाता है। इसी मंत्र की सिद्धि प्राप्त करके शुक्राचार्य में वह

शक्ति आ गयी थी कि वे मृतक को पुनः जीवित कर देते थे। फिर मरणासन्न और आपदग्रस्त की तो बात ही क्या है। इनका नाम ही मृत्युञ्जय है। इनकी श्रद्धाविधि के साथ उपासना करने से दैहिक—दैविक—आधिभौतिक आदि सारे संकट टल जाते हैं। महामृत्युञ्जय की उपासना भगवान् शंकर की उपासना का ही एक भेद है। सामान्यतया प्रायः यह उपासना रोगादि शान्ति के लिये करते हैं, किन्तु इससे सभी प्रकार के संकटों की निवृत्ति होती है। जैसे-राजभय-शत्रुभय-अभिचारभय-अपमृत्युभय-अग्निभय-सर्पभय-कारागारभयादि समस्त ज्ञाताज्ञात भय दूर होते हैं। यदि विधानपूर्वक इनकी आराधना की जाये तो सभी प्रकार से जीवमात्र की रक्षा होती है।

जप करने वाला व्यक्ति मन—वाणी—बुद्धि का संयम करता हुआ आचमन—प्राणायाम करके श्रीगणेशादि देवताओं का स्मरण करे तथा शान्तिपाठ या स्वस्तिवाचन करे। यथा सुविधानुसार शिवपूजन करे तथा ध्यान में श्रीमहामृत्युञ्जय का विशेष ध्यान करें।

संकल्प—ॐ विष्णुः ३ देशकालौसंकीर्त्य ....गोत्रः ....शर्माऽहं (.......गोत्रेण.......नियुक्तोऽहं.......) मम (यजमानस्य) जन्मपत्रानुसारेण ....महादशा—मध्ये ....अन्तरजन्यपीड़ापरिहारार्थं तथा च नवग्रहाणांपीडामपि शान्त्यर्थं मम सकल दैहिक—दैविक—आधिभौतिक समस्त ज्ञाताज्ञात सांसर्गिक पापदोष शमनार्थं, राजभय, चौरभय, शत्रुभय, रोगभय, डाकिनी—शकिनी, पिशाच, वेतालादिभय निवारणार्थं उत्तमायुरारोग्य—ऐश्वर्याभिवृद्ध्यर्थं तथा च भगवान्महामृत्युञ्जयदेवता प्रीत्यर्थं न्यास—ध्यान—पूजनपूर्वकं महामृत्युञ्जयजपानि करिष्ये (यदि यजमान् के लिए कर रहा हो तो 'करिष्यामि' कहे)।

(आदि में ऋष्यादि न्यास करे ।)

ॐ वामदेवकहोलवशिष्ठा—ऋषयः मूर्ध्नि । ॐ पंक्तिगायत्री—अनुष्टुप्छन्दांसि मुखे । ॐ सदाशिवमहामृत्युञ्जयदेवतायै नमो हृदि । ॐ ह्रीं शक्तये नमो लिङ्गे । ॐ श्रीं बीजाय नमः पादयोः ।

इसके बाद विनियोग छोड़ें —

ॐ अस्य श्रीमहामृत्युञ्जयमंत्रस्य वामदेव कहोल वशिष्ठाःऋषयः पंक्तिर्गायत्र्युष्णिगनुष्टुप्छन्दांसि सदाशिवमृत्युञ्जयदेवता ह्रीं शक्तिं श्रीं बीजम् श्रीमहामृत्युञ्जयप्रीतये पूर्वसिद्धाये जपे विनियोगः ॥

मन्त्रः–ॐ हौं ॐ जूं सः भूर्भुवःस्वः त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ॥ ऊर्वारुक मिवबन्धान्मृत्योर्मुक्षीय माऽमृतात् भूर्भुवस्वरोम् जूं सः हौं ॐ ॥

अथ मंत्रन्यासः–ॐ हौं ॐ जूं सः भूर्भुवः स्वः त्र्यम्बकं ॐ नमो भगवते रुद्राय शूलपाणये स्वाहा हृदयाय नमः । ॐ हौं ॐ जूं सः भूर्भुवः स्वः यजामहे ॐ नमो भगवते रुद्रायामृतमूर्तये मां जीवय शिरसि स्वाहा ॥ ॐ हौं ॐ जूं सः भूर्भुवः स्वः पुष्टिवर्द्धनम् ॐ नमो भगवते रुद्राय चन्द्रशिरसे जटिने स्वाहा शिखायै वषट् ॥ ॐ हौं ॐ जूं सः भूर्भुवः स्वः उर्व्वारुकमिवबन्धनात् ॐ नमो भगवते त्रिपुरान्तकाय ॐ ह्रां ह्रीं कवचाय हुम् ॥ ॐ हौं ॐ जूं सः भूर्भुवः स्वः मृत्योर्मुक्षीय ॐ नमो भगवतेरुद्राय त्रिलोचनाय ऋग्यजुःसाममंत्राय नेत्रत्रयाय वौषट् । ॐ हौं ॐ जूं सः भूर्भुवः स्वः मामृतात् ॐ नमो भगवते रुद्राय ॐ अग्नित्रयायज्वलज्वालाय मां रक्ष रक्ष अघोराय अस्त्राय फट् ॥

अथ मंत्र-न्यासः–ॐ त्र्यम्बकं शिरसि । ॐ यजामहे भ्रुवोः । ॐ सुगन्धिं नेत्रयोः । ॐ पुष्टिवर्द्धनं मुखे । ॐ उर्वारुक

गण्डयोः । ॐ इव हृदये । ॐ बन्धनात् जठरे । ॐ मृत्योर्लिङ्गे । ॐ मुक्षीय ऊर्वोः । ॐ मा जान्वोः । ॐ अमृतात्पादयोः ॥

इस प्रकार मूल मंत्र से न्यास करने के पश्चात् ध्यान करे—

ॐ हस्ताम्भोज युगस्थ कुम्भयुगलादुद्धृत्य तोयं शिरः ।
सिञ्चन्तं करयोर्युगेन दधतं स्वाङ्के सकुम्भौ करौ ॥
अक्षस्त्रग्मृगहस्तमम्बुजगतं मूर्धस्थ चन्द्रास्त्रवत् ।
पीयूषार्द्रतनुं भजे सगिरिजं मृत्युञ्जयं त्र्यम्बकम् ॥१॥
ॐ चन्द्रोद्भासित मूर्धजं सुरपतिं पीयूषपात्रंवहत् ।
हस्ताब्जे न दधत्सुदिव्यममलैर्हास्यास्यपङ्केरुहम् ॥
सूर्येन्द्वग्निविलोचनं करतले पाशाक्षसूत्राङ्कुशाम् ।
भोजं विभ्रतमक्षयं पशुपतिं मृत्युञ्जयं तंस्मरे ॥२॥

इस प्रकार भगवान् महामृत्युञ्जय का ध्यान करके यथोपचार पूजन अथवा नीचे लिखे मन्त्रों से मानसिक पूजन करे—

ॐ लं पृथिव्यात्मकं गंधं समर्पयामि ।
ॐ हं आकाशात्मकं पुष्पं समर्पयामि ।
ॐ यं वायव्यात्मकं धूपं समर्पयामि ।
ॐ रं तैजसात्मकं दीपं समर्पयामि ।
ॐ वं अमृतात्मकं नैवेद्यं समर्पयामि ।
ॐ सं सर्वात्मकं पुष्पाञ्जलिं समर्पयामि ।

पूजन के उपरान्त अच्छिन्न जलधारा की व्यवस्था भी करे तो अत्युत्तम है । यह धारा जप—पर्यन्त चलती रहे ।

इसके उपरान्त आरती एवं पुष्पाञ्जलि करके उत्तर पूजन करे । इसके उपरान्त पहले मंत्र का जप करे । जप के उपरांत आरती पुष्पाञ्जलि आदि करे । इसके बाद उत्तर—पूजन तथा जपार्पण करे । इसके लिये हाथ में पुष्पाक्षतजल लेकर देवता के दक्षिण कर की

र मंत्र बोलता हुआ छोड़ दे —

मृत्युञ्जयमहारुद्रो त्राहिमां शरणागतम् ॥
जन्ममृत्युजरारोगैः पीडितं कर्मबन्धनैः ॥
गुह्यातिगुह्य गोप्ता त्वं ग्रहाणास्मत्कृतं जपम् ॥
सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वरः ॥

अनेन श्रीमहामृत्युञ्जयजपाख्येन कर्मणा महामृत्युञ्जयदेवता प्रीयतां न मम ।

इसकी सम्पूर्ण सिद्धि के लिये अपामार्ग की समिधा को दूध घृत और मधु से डुबो कर जप का दशांश हवन, हवन का दशांश तर्पण करे, तर्पण का दशांश मार्जन करे तथा मार्जन का दशांश ब्राह्मण भोजन कराये । इस प्रकार विधिवत अनुष्ठान करने से बड़ी बड़ी व्याधियों का भी निवारण हो जाता है ।

॥ ॐ नमः शिवाय ॥ शुभम् ॥

परिशिष्ट तृतीयः (३)

॥ ॐ नमः शिवाय ॥

पश्चिमवक्त्र पूजन ॥१॥

इस पूजन में विशेषरूप से मैनसिल का तिलक, श्वेत पुष्पाक्षत गुगुल की धूप, घृत का दीपक तथा खीर का नैवेद्य करें । प्रथम जल लेकर विनियोग छोड़े—

ॐ सद्योजातमित्यस्य सद्योजात ऋषिः त्रिष्टुप्छन्दः सद्योजातो देवता श्वेतवर्णं हंसवाहनं पश्चिमवक्त्रं पृथिवी तत्त्वम् पश्चिमवक्त्र पूजने विनियोगः ॥

ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः ॥ भवे भवे नातिभवे भवस्व

मां भवोद्भवाय नमः ॥

पूजन करे उसके बाद हाथ में अक्षत लेकर कलाओं का आवाहन करें—

ॐ ऋद्ध्यै नमः । ॐ सिद्ध्यै नमः । ॐ धृत्यै नमः । ॐ लक्ष्म्यै नमः । ॐ मेधायै नमः । ॐ कान्त्यै नमः । ॐ स्वधायै नमः । ॐ प्रभायै नमः ।

ध्यानम्–प्रालेयामल विन्दु कुन्दधवलं गोक्षीर फेनप्रभम् ॥
भस्माभ्यङ्गमनंग देह दहन ज्वालावली लोचनम् ॥
ब्रह्मेन्द्राग्निमरुद्गणैः स्तुतिपरैरभ्यर्चितं योगिभिः ॥
वन्देऽहं सकलं कलंकरहितं स्थाणोर्मुखं पश्चिमम् ॥१॥
शुभ्रं त्रिलोचनं नाम्ना सद्योजातं शिवप्रदम् ॥
शुद्ध स्फटिक संकाशं वन्देऽहं पश्चिमं मुखम् ॥२॥

उत्तरवक्त्र पूजन ॥२॥

इनके पूजन में विशेषरूप से हरिचन्दन का तिलक, तुलसीपत्र कमल का पुष्प, पंचसौगन्धिक धूप तथा घृतपक्व गोधूम का नैवेद्य चढ़ावे तथा आदि में जल लेकर विनियोग छोड़े—

ॐ वामदेवायेत्यस्य वामदेवऋषिः जगतीछन्दः विष्णुर्देवता कृष्णवर्णंगरुडवाहनं उत्तरवक्त्रं आपस्तत्वं उत्तरवक्त्र पूजने विनियोगः ।

ॐ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय

नमो बलाय नमो बलप्रमथनाय नम ॆ सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥

कला पूजन—ॐ रजसे नमः। ॐ रक्षायै नमः। ॐ रत्यै नमः। ॐ पाल्यायै नमः। ॐ कामायै नमः। ॐ संजीविन्यै नमः। ॐ सियायै नमः। ॐ बुध्यै नमः। ॐ क्रियायै नमः। ॐ धात्र्यै नमः। ॐ भ्रामर्यै नमः। ॐ ज्वरायै नमः।

ध्यानम्—गौरं कुंकुमपिङ्गलं सुतिलकं व्यापाण्डुगंडस्थलम् ॥
भ्रू विपेक्ष कटाक्ष वीक्षण लसत्संसक्त कर्णोत्पलम् ॥
स्निग्धं बिम्बकलाधरं प्रहसितं नीलालकालंकृतम् ॥
वन्दे पूर्ण शशांक मण्डलनिभं वक्त्रं हरस्योत्तरम् ॥१॥
वामदेवं सुवर्णाभं दिव्यास्त्रगणसेवितम् ॥
अजन्मानमुमाकान्तं वन्देऽहं ह्युत्तरं मुखम् ॥२॥

दक्षिणवक्त्र पूजन ॥३॥

इनके पूजन में विशेषरूप से कृष्णागरु का तिलक, नीलकमल एवं करबीर (कनेर) के पुष्प, सफेद अगर की धूप तथा उड़द की दाल का बना नैवेद्य का भोग लगावे। हाथ में लेकर विनियोग करे—

ॐ अघोरेभ्येत्यस्य अघोरऋषिः अनुष्टुप्छन्दः रुद्रोदेवता नीलवर्णं कूर्मवाहनं दक्षिणवक्त्रं तेजस्तत्त्वं दक्षिणवक्त्रपूजने विनियोगः।

ॐ अघोरेभ्योथ घोरेभ्यो घोरघोरतरेभ्यः ॥ सर्वेभ्य ॆ सर्वशर्वेभ्यो नमस्तेऽअस्तु रुद्ररूपेभ्य ॆ ॥

कलापूजन– ॐ तमसे नमः । ॐ मोहायै नमः । ॐ क्षयायै नमः । ॐ निद्रायै नमः । ॐ व्याधये नमः । ॐ मृत्यवे नमः । ॐ सुधायै नमः । ॐ तृषायै नमः ॥

ध्यानम्–ॐ कालाभ्रभ्रमरांजनाचलनिभं व्यादीप्तपिङ्गेक्षणम् ॥
खण्डेन्दुद्युतिमाश्रिग्रदशनं प्रोभिन्नदंष्ट्रांकुरम् ॥
सर्प प्रोत कपालशक्ति सुलभं व्याकीर्ण तच्छेश्वरम् ॥
वन्दे दक्षिणमीश्वरस्य जटिलं भ्रूभङ्ग रौद्रं मुखं ॥१॥
नीलाभ्रवर्णमोंकारमघोरं घोरदंष्ट्रकम् ॥
दंष्ट्राकरालमत्युग्रं वन्देऽहं दक्षिणं मुखम् ॥२॥

पूर्ववक्त्र पूजन ॥४॥

इनके पूजन में हरताल का तिलक, दूर्वाङ्कुर, अकोड़ा के पुष्प तथा अन्य नाना पुष्प कृष्णागरु की धूप तथा मोदक का नैवेद्य अर्पण करें । हाथ में जल लेकर विनियोग छोड़ें—

ॐ तत्पुरुषायेत्यस्य तत्पुरुषऋषिः गायत्रीछन्दः रुद्रोदेवता पीतवर्णं अश्ववाहनं पूर्ववक्त्रं वायुस्तत्त्वं पूर्ववक्त्र पूजने विनियोगः ।

ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि ॥ तन्नोरुद्रः प्रचोदयात् ॥

कलापूजन– ॐ निवृत्यै नमः । ॐ प्रतिष्ठायै नमः । ॐ विद्यायै नमः । ॐ शान्त्यै नमः ।

ध्यानम्–ॐ संवर्ताग्नितडित्प्रदीप्तकनक प्रस्पर्धित:तेजोऽरुणम् ॥
गम्भीर स्मितनिःसृतोग्रदशनं प्रोद्भासिताम्राधरम् ॥
बलेन्दुद्युति लोलपिङ्गल जटाभारं प्रबद्धोरगम् ॥
वन्दे सिद्ध सुरासुरेन्द्र नमितं पूर्वमुखं शूलिनः ॥१॥
बालार्कमारक्तं पुरुषं च तडित्प्रभम् ॥
दिव्यं पिङ्गजटाधारं वन्देऽहं पूर्वदिङ्मुखम् ॥२॥

ऊर्ध्ववक्त्र पूजन ॥५॥

इनके पूजन में विशेषरूप से भस्म का तिलक, बिल्वपत्र, धतूरे का पुष्प तथा अन्य पुष्प भी, हरिचन्दन की धूप तथा दही भात शक्कर का नैवेद्य भोग लगावे। हाथ में जल लेकर विनियोग छोड़े।

ॐ ईशानेत्यस्य ईशान ऋषिः अनुष्टुप्छन्दः रुद्रोदेवता गोक्षीर वर्ण वृषभवाहनम् ऊर्ध्ववक्त्रं आकाशतत्त्वम् ऊर्ध्ववक्त्र पूजने विनियोगः।

ॐ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानाम् ॥ ब्रह्माधिपतिर्ब्रह्मणो-धिपतिर्ब्रह्मा शिवो मेऽअस्तु सदा शिवोम् ॥

कलापूजन– ॐ शशिन्यै नमः। ॐ अङ्गदायै नमः। ॐ इष्टायै नमः। ॐ मरिच्यै नमः। ॐ ज्वालिन्यै नमः।

ध्यानम्–ॐ व्यक्ताव्यक्त गुणोतरं सुवक्दनंषड्विंशतत्वाधिकम् ॥
वेदाद्यक्षर मंत्रशास्त्रनिलयं ध्येयं सदा योगिभिः ॥
वन्देतामस वर्जितेन मनसा सूक्ष्मातिसूक्ष्मं परम् ॥
शान्तं पंचमीश्वरस्य वदनं खव्याप्त तेजोमयम् ॥१॥
ईशानं सूक्ष्मव्यक्तं तेजपुंज परायणम् ॥
अमृतस्त्राविचिद्रूपं वन्देऽहं पंचमंमुखम् ॥२॥

इस प्रकार भगवान शंकर के पांचों–मुखों का पूजन करे तथा नीचे लिखे तीनों मंत्रों का पाठ करे। यह इनकी वैदिक स्तुति है।

ॐ नमोस्तु । रुद्रेभ्यो ये दिवि येषां वर्षमिषवः । तेभ्यो दशप्राचीर्दश दक्षिणादशप्रतीचीर्दशोदीचीर्द-शोर्ध्वाः । तेभ्यो नमोऽअस्तु ते नोवन्तुते नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टितमेषाजंभे दध्मः ॥१॥

ॐ नमोस्तु रुद्रेभ्यो येन्तरिक्षे येषां व्वातऽइषवः । तेभ्यो दशप्राचीर्दश दक्षिणादशप्रतीचीर्दशोदीचीर्द-शोर्ध्वाः । तेभ्यो नमोऽअस्तु ते नोव्वन्तुते नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टितमेषाजंभे दध्मः ॥२॥

ॐ नमोस्तु रुद्रेभ्यो ये पृथिव्यां य्येषामन्नमिषवः ॥ तेभ्यो दशप्राचीर्दश दक्षिणादशप्रती-

च्चीर्दिशोदीं च्चीर्दशोर्ध्वा ऽ । तेभ्यो नमोऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि तमेषां जंभे दध्म ऽ ॥३॥

परिशिष्ट चतुर्थ (४)

॥ ॐ नमः शिवाय ॥

श्रीशिवरात्रि एवं श्रीप्रदोष-उद्यापनविधिः

भगवान शंकर की उपासना करने वाले भक्तजन नाना प्रकार के विधि—विधानों से उनकी आराधना करते हैं तथा भोग और मोक्ष दोनों फल प्राप्त करते हैं। इन्हीं अनेक विधानों में शिवरात्रि, प्रदोष, श्रावण के सोमवार आदि पर्वों का व्रत—पूजन—उद्यापन आदि भी करते हैं। इन सबकी उद्यापन विधि प्रायः एकसी ही हे। थोड़ा बहुत अन्तर हो जाता है। यहाँ संक्षिप्तरूप से जनसाधारण के कर सकने योग्य विधि का उल्लेख कर रहे हैं। हमें आशा है कि इसके द्वारा भक्तजन लाभान्वित होंगे।

उद्यापन करने वाले व्यक्ति को चाहिये कि पहले दिन मनवाणी और इन्द्रियों का संयम करे तथा सात्विकवृत्ति धारण करता हुआ महादेव—पार्वती के गुणानुवादों का चिन्तन करे। सात्विक एवं स्वल्पाहार करे तथा उद्यापन में प्रयुक्त होने वाली सामग्री का संकलन करे। प्रातःकाल ब्राह्मबेला में उठे तथा शौच—स्नान—संध्यादि कार्यों को सम्पन्न करे। फूल—बिल्वपत्र—दूर्वा—आक के फूल—बिल्व फल—धतूर फल आदि विशेष रूप से सुधार कर रक्खे। योग्य आचार्य की अध्यक्षता में लिंगतोभद्रवेदी का निर्माण करावे। एक पट्टे (पीढ़े) पर

गौरी—गणेश, षोडशमातृका—नवग्रह—घृतमातृका की स्थापना हेतु स्थान एवं आकार की रचना कराये। दो कलश तांबे के तथा ५ कलश मृतिका के स्थापित करे। कदलीस्तंभ, बन्दनवार, ध्वजा आदि से मण्डप रचना करे तथा पूर्वोक्त वेदी आदि को तथा कलशों को मण्डप में स्थापित करे। मण्डप के ऊपर वितान (चन्दोवा) ताने।

